Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीगणेशायनमः ॥ अथ त्रिपिण्डी श्राद्ध प्रयोगः ॥ भूत प्रेतादि जनित दुष्टज्वरादि उपद्रव शान्तये त्रिपिण्डी श्राद्धं कर्त्तव्यम् ॥ कार्तिक्यादि चतुर्षुमासेष्वेकादश्यां पचम्या मष्टम्यां त्रयोदश्यां उभयोरपि पक्षयोः कार्यम् ॥ दोषबाहुल्ये सति न कालाऽपेक्षा ॥ नद्यां पुण्यतीर्थे तदभावे शिवालये तुलसी सन्निधानाश्वत्थ सन्निधौ वा कार्यम् ॥ प्रयोगः ॥ विशिष्टे तीर्थे गत्वा शुचिः विधिवत्स्नात्वा तर्पणं कुर्यात् ॥ तद्यथा ॥ आचम्य प्राणानायम्य मासोत्तमेमासेऽमुकमासेऽमुकपक्षे ऽमुकतिथौ ऽमुकवासरे ऽमुकगोत्रः अमुकशर्माहं ममोपात्त दुरितक्षय द्वारा श्रीपरमेश्वर प्रीत्यर्थं देवर्षि मनुष्य पितृ तर्पणं करिष्ये ॥ आवाहनम् ॥ विश्वान्देवानप्सुमावाह

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यिष्ये ॥ ॐ विश्वेदेवा सऽ आगत शृणुताम ऽइम ॅ हवम् ॥
॥१॥ एदं वर्हिर्न्निषीदत ॥ ॐ विश्वेदेवा शृणुते म ॅ हवं ऽमेये
अन्तरिक्षे यऽ उपद्यविष्ठ ॥ येऽअग्नि जिह्वा ऽउतवायजत्राऽ
आसद्यास्मिन्ब्वर्हिषि मा दयध्वम् ॥ आगच्छन्तु महाभागा
विश्वेदेवा महावलाः ॥ ये यत्र विहिता तर्पणे सावधाना
भवन्तु ते ॥ इति जपित्वा ॥ एकैकमञ्जलिं ब्रह्मादि देवभ्यः
दद्यात् ॥ ॐ ब्रह्मा स्तृप्यताम् ॥ १ ॥ ॐ विष्णु स्तृप्यताम्

टि० १ प्रथमया विभक्तया ब्रह्म विष्णु रुद्र प्रजापति संवत्सर सावयव भूतग्राम
चतुर्विधान्तंतृप्यता मित्यैकवचननअन्येषां तु तृप्यन्ता मिति बहुबचनेन इति विवेकः ॥१॥
॥ १ ॐ कार पूर्वकमिति कात्यायनः ॥ मनुष्याणां तथा कुर्यात्तर्पणं कंठ सूर्यनम्
प्रजापत्येन तीर्थेन तर्पयेत् ब्राह्मणः सुतान् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ रुद्रस्तृप्यताम् ॥ ३ ॥ ॐ प्रजापतिस्तृप्यताम् ॥ ४ ॥
ॐ देवास्तृप्यंताम् ॥ ५ ॥ ॐ छन्दा ँ सि तृप्यंताम् ॥ ६ ॥
ॐ वेदास्तृप्यंताम् ॥ ७ ॥ ॐ ऋषयस्तृप्यन्ताम् ॥ ८ ॥ ॐ
पुराणाचार्यास्तृप्यन्ताम् ॥ ९ ॥ ॐ गंधर्वा स्तृप्यन्ताम् ॥
१० ॥ ॐ इतराचार्यास्तृप्यन्ताम् ॥ ११ ॥ ॐ संवत्सर
स्सावयव स्तृप्यताम् ॥ १२ ॥ ॐ देव्यस्तृप्यन्ताम् ॥ १३ ॥
ॐ अप्सरसस्तृप्यन्ताम् ॥ १४ ॥ ॐ देवानुगास्तृप्यन्ताम्
॥ १५ ॥ ॐ नागास्तृप्यन्ताम् ॥ १६ ॥ ॐ सागरास्तृप्यन्ताम्
॥ १७ ॥ ॐ पर्वतास्तृप्यन्ताम् ॥ १८ ॥ ॐ सरितस्तृप्य-
न्ताम् ॥ १९ ॥ ॐ मनुष्यास्तृप्यन्ताम् ॥ २० ॥ ॐ यक्षा-
स्तृप्यन्ताम् ॥ २१ ॐ रक्षा ँ सि तृप्यन्ताम् ॥ २२ ॥ ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पिशाचा स्तृप्यन्ताम् ॥ २३ ॥ ॐ सुपर्णास्तृप्यन्ताम् ॥ २४ ॥ ॐ भूतानि तृप्यन्ताम् ॥ २५ ॥ ॐ पशवस्तृप्यन्ताम् ॥ २६ ॥ ॐ वनस्पतयस्तृप्यन्ताम् ॥ २७ ॥ ॐ ओषधयस्तृप्यन्ताम् ॥ २८ ॥ ॐ भूतग्रामचतुर्विधस्तृप्यताम् ॥ २९ ॥ ततः कण्ठं कृत्वा । सनकादि द्वौ द्वौ अञ्जलिं दद्यात् ॥ ॐ सनक[1] स्तृप्यताम् ॥ १ ॥ ॐ सनन्दनस्तृप्यताम् ॥ २ ॥ ॐ सनातनस्तृप्यताम् ॥ ३ ॥ ॐ कपिलस्तृप्यताम् ॥ ४ ॥ ॐ आसुरिस्तृप्यताम् ॥ ५ ॥ ॐ वोढुस्तृप्यताम् ॥ ६ ॥

१ टि० सनक इत्यादि अर्यमा स्तृप्यतामित्यन्तमेक वचनेन ॥ शेषं बहुवचनेन इति ॥ एकैक स्थले तिलै मिश्रान् त्रींत्रीं दद्याज्जलाञ्जलीन् ॥ जावज्जीव कृतं पापं तत्क्षणादेवनश्यति ॥ इति जीवत्पितृकोपि कर्तव्यः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ पञ्च शिखस्तृप्यताम् ॥ ७ ॥ ततोऽपसव्यम् ॥ दक्षिणाभि मुखः पितृनावा हयिष्ये ॥ ॐ उशन्तस्त्वा निधि मह्युशन्तः समिधी महि ॥ उशन्नु शन्तऽआवह पितृन्हविषेऽअत्तवे ॥ १ ॥ ॐ आयंतुनः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन यज्ञे स्वधया मदन्तोधिब्रुवन्तु ते वन्त्वस्मान् ॥ २ ॥ तिलैर्मिश्रान् कव्यवाडनलादिभ्यस्त्रीनंजलीं दद्यात् ॥ ॐ कव्यवाड नल स्तृप्यताम् ॥ ३ ॥ ॐ सोम स्तृप्यताम् ॥ ३ ॥ ॐ यम स्तृप्यताम् ॥ ३ ॥ ॐ अर्यमा स्तृप्यताम् ॥ ३ ॥ ॐ अग्निष्वात्ता पितरस्तृप्यन्ताम् ॥ ३ ॥ ॐ सोमपा पितरस्तृप्यन्ताम् ॥ ३ ॥ ॐ बर्हिषदः पितरस्तृप्यन्ताम् ॥ ३ ॥ ॐ यमायनमः ॥ ३ ॥ ॐ धर्मायनमः ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० ॐ मृत्यवे नमः ३ ॥ ॐ अन्तकाय नमः ३ ॥ ॐ वैवस्वताय आ०
॥३॥ नमः ३ ॥ ॐ कालाय नमः ३ ॥ ॐ सर्वभूत क्षयाय
नमः ३ ॥ ॐ औदुम्बराय नमः ३ ॥ ॐ दध्नाय नमः ३ ॥
ॐ नीलाय नमः ३ ॥ ॐ परमेष्ठिने नमः ३ ॥ ॐ वृको-
दराय नमः ३ ॥ ॐ चित्राय नमः ३ ॥ ॐ चित्रगुप्ताय
नमः ॥ ३ ॥ ॐ अद्यामुक[1] गोत्रः पिताऽमुकशर्मा वसुरूप
स्तृप्यता मिदं तिलोदकं तस्मै स्वधा नमः ३ ॥ ॐ अद्यामुक
गोत्रः पितामह अमुकशर्मा रुद्र रूपस्तृप्यतामिदं तिलोदकं

---

१ टि० तातम्बा त्रितयं सपत्न जननी माता महादित्रयं सस्त्री स्त्री तनयादि तातजननी स्वभ्रातरः सस्त्रियः । तातम्बात्म भगिन्य पत्यधवयुक् जाया पिता सद्गुरुः १ शिष्या प्ताः पितरो महालय विधौ तीर्थे तथा तर्पणे ॥ इति ॥१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्मै स्वधा नमः ॥ ३ ॥ ॐ अद्यामुक गोत्रः प्रपितामहा-मुक शर्मा आदित्य रूपस्तृताप्यतामिदं तिलोदकं तस्मै स्वधा नमः ॥ ३ ॥ ॐ उदीरतां मवरऽउत्परासउन्मध्यमाः पितरः सोम्या सः ॥ असुँयऽईयुरवृकाऽऋतज्ञास्तेनो वन्तुपितरो हवेषु ॥१॥ ॐ अङ्गिरसोनःपितरो न वग्वाऽअथर्वाणो भृगवः सोम्यासः ॥ तेषां वयठं सुमतौ यज्ञियानामपिभद्रे सौ मनसे स्याम ॥ २ ॥

---

१ टि० एता नवर्चं उपांशु स्वरेण जपन् अंजलिना जलधाराप्रसिंचेत् ॥ अत्र सूत्रेभावे च मातृ तर्पणं काल स्यानुक्तत्वात् ॥ प्रसेकानन्तरं मातृ तर्पणं कार्यम् ॥ उक्तं च पारासरेण ॥ पितृत्रयीं तर्पयित्वा मंत्रैस्तुनवभिः क्रमात् ॥ प्रसिंचे दथ मातृणां तर्पणं क्रमत श्चरेत् ।. इतिसंतर्प्य ततो माता महान्यजेत् ॥ इति ॥ माता पितामहीचैव तथैव प्रपिता मही । एतासां पितृवद्दद्यात् शेषा एकैक मञ्जलिमिति ।' सालंकायन वचनात् ॥ तिस्त्रः तिस्त्रः एवाञ्जलयोदेयाः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० ॐ आयंतुनः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देव श्रा०
॥४ यानैः॥ अस्मिँ यज्ञे स्वधया मदन्तोधिब्रुवन्तुते वन्त्वस्मान्॥३॥
ॐ ऊर्ज्जं वहन्ती रमृतं घृतम्पयः कीलालम्परिश्रुतम्॥ स्वधा-
स्थ तर्पयत मे पितॄन्॥ ४॥ ॐ पितृभ्यः स्वधायिभ्यः
स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपिता
महेभ्यः स्वधायिभ्यः स्वधानमः॥ अन्नन्पितरो मीमदन्त
पितरो तीतृपन्त पितरः पितरः शुन्धध्वम्॥ ५॥ ॐ येचेह
पितरो येचनेह यांश्च विद्मयाँ २॥ उच्च नप्रविद्म॥ त्वं
वेत्थ यतिते जातवेदः स्वधाभिर्यज्ञठंसुकृतञ्जुषस्व॥ ६
ॐ मधुव्वाता ऋतायते मधुक्षरन्ति सिन्धवः माद्ध्वीर्न्नः ॥३॥
सन्त्वोषधीः॥ ७॥ ॐ मधु नक्त मुतोषसो मधु मत्पार्थिवठं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रजः ॥ मधुद्यौ रस्तुनः पिता ॥ ८ ॥ ॐमधुमान्नो ब्वन
स्पतिर्म्मधुमाँ २ ॥ऽअस्तु सूर्य्यः ॥ माद्ध्वीर्गावो भवन्तुनः ॥६॥
मधु मधु मधु ॥ तृप्यध्वं तृप्यध्वं तृप्यध्वं ॥ ॐ अद्यामुक
गोत्राऽस्मन्माता अमुकी देवी वसुरूपा तृप्यता मिदं तिलो-
दकं तस्यै स्वधानमः ३ ॥ अद्यामुकगोत्राऽस्मन्पितामही
अमुकी देवी रुद्र रूपा तृप्यतांमिदं तिलोदकं तस्यै स्वधा
नमः ३ ॥ अद्यामुक गोत्राऽस्मन्प्रपिता मही अमुकी देवी
आदित्य रूपा तृप्यता मिदं तिलोदकं तस्यै स्वधानमः ३ ॥
ॐ नमोवः पितरो रसाय नमोवः पितरः शोषाय नमोवः
पितरो जीवाय नमोवः पितरः स्वधायै नमोवः पितरो घोराय
नमोवः पितरो मन्न्यवे नमोवः पितरः पितरो नमोवो गृहान्नः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० पितरो दत्त सतोवः पितरो देष्म इति पठित्वा मातामहादीं- श्रा०
॥५॥ स्तर्पयेत् ॥ अद्यामुक गोत्रः मातामहा मुकशर्मा वसुरूपस्तृप्य-
तामिदं तिलोदकं तस्मै स्वधा नमः ३ ॥ अद्यामुकगोत्रः प्रमाता
महामुक शर्मा रुद्ररूपस्तृप्यता मिदं तिलोदकं तस्मै स्वधा
नमः ३ ॥ अद्यामुक गोत्रः वृद्ध प्रमातामहामुक शर्मा आदित्य
रूपस्तृप्यता मिदं तिलोदकं तस्मै स्वधा नमः ॥ ३ ॥ ततो
माता महादीनां त्वेकैकमञ्जलीं दद्यात् ॥ अद्यामुक गोत्रा
मातामही अमुकी देवी वसुरूपा तृप्यता मिदं तिलो
दकं तस्यै स्वधा नमः ? ॥ अद्यामुकगोत्रा प्रमाता
मही अमुकी देवीरुद्ररूपास्तृप्यता मिदं तिलोदकं तस्यै ॥५॥
स्वधा नमः १ ॥ अद्यामुक गोत्रा वृद्धप्रमाता मही अमुकी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवी आदित्य रूपा स्तृप्यता मिदं तिलोदकं तस्यै स्वधानमः १ ॥ अद्यामुक गोत्रा पत्नी अमुकी देवी बसु रूपा तृप्यता मिदंतिलोदकं तस्यै स्वधा नमः १ ॥ अद्यामुक गोत्र तनय १ बसुरूप स्तृप्यता मिदं तिलोदकं तस्मै स्वधानमः १ ॥ अद्या मुकगोत्रा तनया दुहितावा बसुरूपा तृप्यतामिदंतिलो दकं तस्यै स्वधा नमः १ ॥ अद्यामुकगोत्रः पितृब्यकः अमुक शर्मा वसुरूप स्तृप्यता मिदं तिलोदकं तस्मै स्वधानमः १ ॥

---

१ टि० अत्र तनयादि गुर्वान्तेषु पुरुषेषु सपत्नीकः ससुतः पित्तृ भगिन्यादिषु सभर्त्तृका ससुतेत्यूहः सति संभवे ज्ञेयः ॥ पित्तृ भगिनी मात्तृ भगिनी आत्म भगिनी स्वसुरो गुरुः ॥ अथ गुरु राचार्य उपनयन पूर्वक वेदाध्यापक इति हरदत्तो पाध्यायः ॥ शिष्य । आप्तः । ऋत्विक् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० अद्यामुक गोत्रः मातुलः अमुक शर्मा वसुरूप स्तृप्यता मिदं श्रा०
॥६॥ तिलोदकं तस्मै स्वधा नमः १ ॥ अद्यामुक गोत्रः भ्राता अमुक
शर्मा वसुरूप स्तृप्यता मिदं तिलोदकं तस्मै स्वधा नमः १ ॥
ततः एकाञ्जलिं सतिलं वक्ष्यमाणमंत्रैर्दद्यात् ॥ तत्र मंत्रः ॥
ॐ आब्रह्म स्तंबपर्यन्तं देवर्षि पितृ मानवाः ॥ तृप्यन्तु
पितरः सर्वे मातृमाता महादयः ॥ अतीतः कुल कोटीनां सप्त
द्वीप निवासिनाम् ॥ आब्रह्म भुवनाल्लोका दिदमस्तु तिलो
दकम् १ ॥ ये बाँधवा बाँधवा वा येऽन्य जन्मनि वाँधवाः ॥
ते सर्वे तृप्ति मायान्तु मया दत्तेन बारिणा इति तीर्थ तटे
द्वितीयाञ्जलिं क्षिपेत् ॥ येके चास्मत्कुले जाता अपुत्रा गोत्रिणो ॥६॥
मृताः ॥ ते पिवन्तु मया दत्तं बस्त्र निष्पडीनोदकम् ॥ इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वस्त्र निष्पीडनम् ॥ सव्यमाचम्य ॥ जले गंधाक्षत पुष्पाणि निःक्षिपेत् ॥ तत्रप्रकारः ॥ ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ता द्विषी मतः सुरुचो व्वेनऽआवः ॥ सबुध्न्या ऽउपमाऽअस्य बिष्ठाः शतश्च योनि मशतश्च व्विवः ॥ ॐब्रह्मणे नमः ॥ ब्रह्माणं ॥ १ ॥ ॐइदं विष्णुर्व्विचक्रमे त्रेधा निदधे पदम् ॥ समूढ मस्यपा ँ सुरे स्वाहा ॥ ॐ विष्णवे नमः ॥ विष्णुमा० ॥ २ ॥ ॐ नमस्ते रुद्र मन्न्यवऽ उतोतऽइषवे नमः ॥ बाहुभ्या मुतते नमः ॥ ॐ रुद्राय नमः रुद्रमा० ॥ ३ ॥ ॐ तत्सवितु र्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात् ॥ ॐ सवित्रेनमः सवितारं० ॥ ४ ॥ ॐ मित्रस्य च र्षणी धृतो वो देवस्य सानसि ॥ द्युम्नं श्चित्र स्रवस्तमम् ॥ ॐ मित्राय नमः मित्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मावा हयामि ॥ ५ ॥ ॐ इमम्मे ०वरुण स्रुधी हवमद्या च श्रा०
तृ० मृडय ॥ त्वामवस्युरा चके ॥ ॐ वरुणायः वरुणमा० ॥ ६ ॥
॥७॥ ततः तर्पणांगं सूर्य्योपस्थानं १ तिष्ठं ऊर्ध्वं बाहूः सूर्य्यमुदी
क्षन्पठेत् ॥ ॐ अदृश्रमस्य केतवो बिरस्म यो जनाना ँ ॥
ऽअनु ॥ भ्राजन्तोऽअग्नयो यथा ॥ उपयामगृहीतोसि सूर्य्या-
यत्वा भ्राजायैषते योनिः सूर्य्यायत्वा भ्राजाय सूर्य्य भ्राजिष्ठस्त्व
न्देवेष्वासि भ्राजिष्ठोहं मनुष्येषु भूयासम् ॥ ॐहठं० सः शुचि
षद्वसु रन्तरिक्ष सद्धोता बेदि षदितिथि र्दुरोणसत् ॥ नृष द्वर

---

१ टि केचिन्मते उपस्थानात्पूर्वं सूर्यार्घ्यं दद्यात् ॥ ॐ तत्सवितुरिति ॥ वा ॥७॥
पहि सूर्य सहस्रांसो तेजो राशि जगत्पते ॥ अनुकंपय मांभक्तया गृहाणार्घ्यं
दिवाकर ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सद्दत सद्व्योम सदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतं वृहत्
प्रदक्षिणी कृत्य क्रमेण नमस्कारं कुर्यात् ॥ ॐ प्राच्यैदिशे नमः
इन्द्राय नमः ॥ १ ॥ ॐ आग्नेयै दिशे नमः अग्नये नमः॥ ॐ
दक्षिणायैदिशेनमः यमाय नमः ॥ ३ ॥ ॐ नैऋत्यै दिशे नमः
निऋतये नमः ॥ ४ ॥ ॐ पश्चिमायै दिशे नमः वरुणाय नमः
॥ ५ ॥ ॐ वायव्यै दिशे नमः वायवेनमः ॥ ६ ॥ ॐ उदीच्यै
दिशे नमः सोमाय नमः ॥ ७ ॥ ॐईशान्यदिशेनमः ईशानाय
नमः ॥ ८ ॥ ॐ ऊर्ध्वायै दिशे नमः ब्रह्मणे नमः ॥ ६ ॥ ॐ
अधः दिशे नमः अनन्ताय नमः ॥ १० ॥ इतिदशदिग्देवता
नमस्कृत्यो पविश्य ॥ ॐ ब्रह्मणे नमः । ॐ अग्नये नमः । ॐ
पृथिव्यै नमः । ॐ ओषधीभ्यो नमः ॥ ॐ वाचे नमः । ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० वाचस्पतये नमः। ॐ विष्णवे नमः । ॐ महद्भ्यो नमः । श्रा०
॥८॥ ॐ अद्भ्यो नमः ॥ ॐ अपांपतये नमः । ॐ वरुणाय नमः ।
इत्यैकैकस्य जलाञ्जलिं दद्यात् ॐ सँवर्च्चसा पयसा
सन्तनूभिरगन्महिं मनसा स ँ शिवेन ॥ त्वष्टा सुदत्रो विद-
धातु रायो नुमार्ष्टु तन्वो यद्विलिष्टम् ॥ इति मंत्रेण जलेन
मुखं विमृज्य ॥ ॐ देवा गातु विदो गातुं वित्वा गातु मित ॥
मनसस्पत इमं देव यज्ञ ँ स्वाहा वातेधाः ॥ इति मंत्रेण
देवान्विसर्जयेत् ॥ अनेन देवर्षिमनुष्यपितृतर्पणाख्येन
कर्मणा तेन श्री परमेश्वर प्रीयतां नमम ॥ इति तर्पण समाप्तः ॥

अथश्राद्धारम्भः ॥ स्थलं प्रक्षाल्य गोमयेनोपलिप्य ॥८॥
रक्षा दीपं निधाय प्राङ्मुखोपविश्याचम्य प्राणानायम्य ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संकल्पः त्रिकुश यवाक्षत जल द्रव्यं चादाय॥ ॐ तत्सदद्य मासोत्तमे मासे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकगोत्रः अमुकशर्माहं श्रीपरमेश्वर प्रीत्यर्थं त्रिपिण्डी श्राद्धाधिकार सिद्ध्यर्थं च न्यासपूर्वकं षोडशोपचारैः विष्णु पूजनं करिष्ये॥ प्रथमतः विनियोग पूर्वकं न्यासं कुर्यात्॥ तद्यथा॥ ॐ सहस्रशीर्षेति षोडशर्चस्य नारायणऋषिः अनुष्टुप्छन्दः पुरुषो देवताः पुरुषसूक्तन्यासे पूजने विनियोगः॥ ॐ सहस्र शीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥ सभूमिꣳ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥ वामहस्ते॥ ॐ पुरुषएवेद ꣳ सर्वं यद्भूतं यच्चभाव्यम्॥ उतामृतत्वस्येशानो यदन्ने नातिरोहति॥ दक्षिणहस्ते॥ ॐ एतावानस्य महिमातो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० ज्यायाँश्च पूरुषः ॥ पादोस्य व्विश्श्वा भूतानि त्रिपादस्या आ०
मृतन्दिवि ॥ वामपादे ॥ ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः पादो
६ स्येहाभवत्पुनः ॥ ततोव्विषष्वङ् व्यक्त्रा मत्साशनान
शनेऽअभि ॥ दक्षिणपादे ॐ ततोव्विराड्ज्जायत व्विराजोऽ
अधिपूरुषः ॥ सजातोऽअत्यरिच्यत पश्चाद्भूमि मथोपुरः ॥
वामजानौ ॥ ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम् ॥
पशूँस्ताँश्चक्रे वायव्यानारण्ण्या ग्राम्म्याश्च ये ॥ दक्षिणजानौ ॥
ॐ तस्माद्यज्ञात्सर्वहुतऋचः सामानि यज्ञिरे ॥ छन्दा ँ सियज्ञिरे
तस्माद्यजुस्तस्मा दजायत ॥ वामकट्यां ॥ ॐ तस्मादश्वाऽ
अजायन्त ये के चो भयादतः ॥ गावोह यज्ञिरे तस्मात्तस्म्मा ६
ज्जाताऽअजावयः ॥ दक्षिणकट्यां ॥ ॐ तँयज्ञँ वर्हिषि प्रौक्ष

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्पुरुषञ्जात मग्रतः ॥ तेनदेवाऽअयजन्त साध्याऽऋषय
श्चये ॥ नाभौ ॥ ॐ यत्पुरुषं व्यदधुः कतिधाव्यकल्पयन् ॥
मुखङ्किमस्यासीत्किम्बाहू किमूरूपादाऽउच्येते ॥ हृदये ॥
ॐ ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः ॥ ऊरू तदस्य
यद्वैश्यः पद्भ्या ँ शूद्रोऽ अजायत ॥ कंठे ॥ ॐ चन्द्रमा मनसो
जातश्चक्षोः सूर्य्योऽअजायत ॥ श्श्रोत्राद्वायुश्च प्प्राणश्च मुखा
दग्नि रजायत ॥ वामबाहौ ॥ ॐ नाभ्याऽआसीदन्तरिक्ष ँ॰
शीर्ष्णोद्यौः समवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथा लोकाँ २॥
ऽअकल्पयन् ॥ दक्षिणबाहौ ॥ ॐ यत्पुरुषेणहविषा देवा यज्ञ
मतन्वत ॥ व्वसन्तोस्यासी दाज्यङ्ग्रीष्मऽइद्धमःशरद्धविः ॥मुखे॥
ॐ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ॥ देवायद्यज्ञ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्तन्न्वानाऽअ्रबध्ननन्न्पुरुषम्पशुम् ॥ नेत्रयोः ॥ ॐयज्ञेन यज्ञमय श्रा०
तृ० जन्तदेवास्तानि धर्म्माणि प्रथमान्न्यासन् ॥ तेहनाकम्महिमा
नःसचन्त यत्र पूर्वे साद्ध्याः सन्तिदेवाः ॥ शिरसि ॥ अ्रद्भ्यःइति
१० षडर्चस्योत्तरनारायणऋषिःआद्यानां तिसृणां त्रिष्टुप्छंदः चतुर्थपं
चमयोरनुष्टुप्छन्दःषष्ठस्य त्रिष्टुप् छंदःआदित्योदेवतान्यासे पूज
ने विनियोगः॥ॐअ्रद्भ्यःसम्भृतःपृथिव्यै रसाच्चविश्वकर्म्मणःसम
वर्त्तताग्ग्रे॥तस्यत्त्वष्टाविदधद्रूपमेति तन्न्मर्त्त्यस्य देवत्व माजा
नमग्ग्रे ॥ हृदये ॥ व्वेदाहमेतम्पुरुषम्महान्तमादित्य वर्णन्तमसःपर
स्तात् ॥ तमेव विदित्वातिमृत्युमेति नान्न्यःपन्था विद्यतेयनाय॥
शिरसे॥ॐप्प्रजा पतिश्चरति गर्भेऽअ्रन्तरजायमानो ब्बहुधा ब्वि १०
जायते ॥ तस्ययोनिम्परिपश्यन्तिधीरास्तास्मिन्न्हतस्थुर्भुवनानि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऽविश्श्वा ॥ शिखायैवषट् ॥ ॐयोदेवेभ्यऽआतपतियोदेवाना
म्पुरोहितः॥ पूर्वोयोदेवेभ्योजातो नमो रुचायब्राह्मये॥ कवचाय
हुं ॥ ॐरुचम्ब्राह्मञ्जनयन्तो देवाऽअग्रेतदब्रुवन्॥ यस्त्वैवम्ब्रा
ह्मणो ऽविद्यात्तस्यदेवाऽअसन्नवशे ॥ नेत्रत्रयायवौषट् ॥ॐ श्रीश्च
तेलक्ष्मीश्चपत्न्यावहो रात्रेपार्श्वेनक्षत्राणिरूप मश्विनौव्यात्तम्
इष्णन्निषाणामुम्मऽइषाण सर्व्वलोकम्मऽइषाण ॥ अस्त्रायफट्॥
अथशालग्राम शिलोपरि आवाहनादि पुष्पाञ्जल्यन्तं पूजयेत् ॥
तद्यथा॥ ॐसहस्रशीर्षा आवाहनं॥ ॐ पुरुषएवेदं० आसनं॥ ॐ
एतावानस्य० पाद्यम्॥ ॐत्रिपादूर्ध्वं० अर्घ्यं॥ ॐततोविराड्० आच
मनीयम्॥ ॐपञ्चनद्यःसरस्वती मपियन्ति सस्रोतसः॥ सरस्वती तु
पञ्चधासो देशे भवत्सरित्॥पञ्चामृतस्नानं.॥ ॐदेवस्यत्वासवि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तुःप्रसवेऽश्विनोर्वाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ शुद्धोदकस्नानम् ॥ ॐ श्रा०
तृ० तस्माद्यज्ञात् वा स्नानम् ॥ ॐ तस्मादश्वा ० यज्ञोपवीतम् ॥ आचमनी
११ यम् ॥ ॐ सुजातो उपवस्त्रम् ॥ आचमनीयम् ॥ ॐ तँयज्ञम्वर्हिषि
गंधं. ॥ ॐ यत्पुरुषं. ॥ तुलसीदलंपुष्पंच ॥ ॐ ब्राह्मणोस्य धूपम् ॥
ॐ चन्द्रमामनसो" दीपम् ॥ नाभ्याआसीद" नैवेद्यम्. ॥ ॐ यत्पु
रुषेण" ताम्बूलम् ॥ ॐ सप्तास्यासन्" ॥ प्रदक्षिणा ॥ ॐ हिरण्यग-
र्भः ॥ दक्षिणाम् ॥ ॐ इदंꣳ" हविःप्रजननम्मेऽअस्तुदशवीरꣳ" सर्वगण
ꣳ स्वस्तये ॥ आत्मसनिप्प्रजाशनिपशुशनिलोकसन्न्यभयशनि ॥
अग्निःप्प्रजाम्बहुलाम्मे करोत्वन्नं पयोरेतोऽअस्मासुधत्त ॥
कर्पूरार्त्तिक्यम् ॥ ॐ यज्ञेनयज्ञ. पुष्पाञ्जलिम् ॥ ॐ इदंवि ११
ष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमस्कारःप्रार्थना ॥ अनादिनिधनोदेव शंखचक्रगदाधर ॥ अक्षय्यपुण्डरीकाक्षप्रेतमोक्षप्रदोभव ॥ इतिप्रार्थना ॥ एतैः षोडशोपचारैःमुक्तिप्रद श्रीमहाविष्णुःप्रीयतां नमम ॥ पुनःआचम्य प्राणानायम्यपवित्रधारणम् ॥ ध्यानम् ॥ श्राद्धारम्भेगयाध्यात्वा ध्यात्वा देवं गदाधरम् ॥ ताभ्यांचवैनमस्कारंततःश्राद्धसमाचरेत् ॥ इतिध्यानम् ॥ रक्षादीपंनिधाय ॥ ततो गौरसर्षपान्गृहीत्वा ॥ नमोनमस्तेगोविन्द पुराण पुरुषोत्तम ॥ इदंश्राद्धंहृषीकेश रक्षत्वं सर्वतोदिशः ॥ ॐ प्राच्यैनमः ॥ ॐ अवाच्यैनमः ॥ ॐप्रतीच्यैनमः ॥ ॐउदीच्यैनमः । ॐअन्तरिक्षायनमः । ॐ भूम्यैनमः ॥ इतिविकिरेत् ॥ ॐ यवपुष्पैःश्राद्धभूम्यैनमः ॥ इति त्रिःभूमिंसम्पूज्य ॥ ततोकर्मपात्रंकुर्यात् ॥ तद्यथा ॥ आसने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सू० पात्रं पात्रे पवित्रम् ॥ ॐशन्नोदेवी रभिष्टयऽआपोभवन्तुपी श्रा०
तये ॥ शंय्योरभिस्रवन्तुनः ॥ इतिपात्रेजलम् ॥ गंधपुष्पतुलसी
१२ यवतंडुलतिलतूष्णीं पात्रे प्रक्षेपः ॥ कुशेनालोड्य इमं मंत्रं पठेत् ॥
वरोवरेण्यो वरदो वराहो धरणीधरः ॥ आयातु कर्मपात्रेस्मि
न्सर्वदिक्षुभयापहम् ॥ ततो कलशाभिमंत्रणम् ॥ ॐयद्देवादेव
हेडनं देवासश्चकृमाऽवयम् ॥ अग्निर्म्मातस्म्मादेनसोविश्श्वा
न्मुञ्चत्वꣳहसः ॥१॥ यदिदिवायदिनक्तमेनाꣳसिचकृमाऽवयम् ॥
ऽवायुर्म्मातस्म्मादेनसोविश्श्वान्मुञ्चत्वꣳहसः ॥ २ ॥ यदि
जाग्रद्यदिस्वप्नऽएनाꣳसिचकृमाऽवयम् ॥ सूर्य्योमातस्म्मादे
नसोऽविश्श्वान्मुञ्चत्वꣳहसः ॥ ३ ॥ इतिमंत्रेणाभिमंत्रयेत् १२
ॐआपोहिष्ठामयोभुवस्तानऽऊर्ज्जे दधातन ॥ महेरणाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चक्षसे ॥ १ ॥ ॐ योवःशिव तमो रशस्तस्य भाजयते हनः ॥ उशतीरिव मातरः ॥ २ ॥ ॐ तस्माऽअरङ्गमामवो यस्यक्षया यजिन्वथ ॥ आपो जनयथाचनः ॥ ३ ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोपिवा ॥ यःस्मरेत्पुण्डरीकाक्षं सवाह्याभ्यंतरः शुचिः ॥ इतिवा कुशेनात्मानं सम्भारांश्च संप्रोक्ष्य ॥ संकल्पः॥ देशकालौसंकीर्त्य०॥अपसव्यम् । अमुक गोत्रः अमुकशर्मा मम-कुले विविधपीडाकारिणां संतति वृद्धिप्रतिवंध कारिणां अपत्या दिहिंसकानां अस्मत्कुले प्रभवानां ज्ञाताज्ञातगोत्रशर्मणां विप्रा णां क्षत्रियाणां वैश्यानां शूद्राणां अनुलोमजातीनां निषादजा तीनां नीचजातीनां च पुंसां स्त्रीणां च भूत प्रेत पिशाच ब्रह्मरा-क्षस सत्वादि पाप योनिगतानां द्वेषादि प्रीत्यादि गृहधनादि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संवंधेन अस्मत्कुले पीडा कारिणां नागादीनां पिशाचत्वादि श्रा०
तृ० दिव्यन्तरिक्षभूमिस्थानां वायुरूपाणां सात्विक राजस तामसानां
१२ विष्णु ब्रह्म रुद्रमयानां प्रेतानां प्रेतत्व निवृत्तिपूर्वक उत्तम
लोकप्राप्त्यर्थं ममसकुटुम्बस्य सपरिवारस्यायुरारोग्यैश्वर्या
भि वृद्ध्यर्थं सकलपीडापरिहारार्थं सकल मनोरथावाप्त्यर्थं
च काशीक्षेत्रान्तर्गत पिशाचमोचन विमलतीर्थे दालभ्योपदिष्ट
कल्पेन गरुडपुराणोक्त कल्पेन च त्रिपिण्डी श्राद्ध महं
करिष्ये ॥ ततो विष्णुसमीपे दक्षिण दिशि ॥ सव्यंकृत्वा
गायत्री त्रिर्जपित्वा ॥ सात्विकेभ्यो राजसेभ्यो तामसेभ्य
स्तथैवच ॥ विष्णु ब्रह्म रुद्रेभ्यश्च नित्यमेव नमोनमः ॥ इति १३
त्रिःपठित्वा ॥ पश्चिमतःआरभ्य प्रागन्ताःत्रीन्कलशान्स्था-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पयेत् पूजयेत् च ॥ तद्यथा ॥ ॐ महीद्यौः पृथिवी चनऽइमं यज्ञं मिमिक्षताम् ॥ पिपृतान्नो भरीमभिः इति भूमिं स्पृष्ट्वा ॥ ॐ ओषधयः समवदन्त सोमेन सह राज्ञा यस्मै कृणोति ब्राह्मणस्तᳬ राजन्पारयामसि इतिधान्यं विकिरेत् ॥ ॐ आजिघ्र कलशं मह्यात्वा विशन्त्विन्दवः । पुनरूर्ज्जानिवर्तस्वसानः ॥ सहस्रन्धुक्ष्वोरुधारा पयस्वतीपुनर्मा विशताद्रयिः ॥ इति धान्योपरिकलशं स्थापयेत् ॥ ॐ वरुणस्योत्तम्भनमसि व्वरुण स्यस्कम्भसर्जनीस्थो व्वरुणस्य ऋतसदन्यसि व्वरुणस्य ऋत सदनमसि व्वरुणस्य ऋतसदनमासीद ॥ इति ॥ कलशेजलं पूरयेत् ॥ ॐ त्वां गन्धर्व्वाऽअखनँस्त्वा मिन्द्रस्त्वाम्बृहस्पतिः ॥ त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्च्यत ॥ इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कलशेगंधं क्षिपेत् ॥ ॐयाऽओषधीःपूर्वाज्जाता देवेभ्यस्त्रियुगं श्रा०
तृ० पुरा ॥ मनैनुवभ्रूणा महठं॰ शतंधामानि सप्तच॥इतिकलशे
१४ सर्वौषधी क्षिपेत्॥ ॐकाण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्परि
एवानो दूर्वे प्रतनु सहस्रेण शतेनच ॥ इतिदुर्वाङ्कुरान्क्षिपेत् ॥
ॐ अश्वत्थेवोनिषदनम्पर्णे वो वसतिष्कृता॥गोभाजऽइत्किला
सथयत्सनवथपूरुषम् ॥ इतिपञ्चपल्लवान् ॥ ॐस्योनापृ
थिविनोभवान्नृक्षरानिवेशनि ॥ यच्छानःशर्म्मसप्रथाः ॥
इतिसप्तमृदः ॥ ॐ याःफलिनीर्याऽअफलाऽअपुष्पा याश्चपु
ष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वठं हसः ॥ इतिपुङ्गी
फलम् ॥ ॐ परिवाजपतिःकविरग्निर्हव्यान्यक्रमीत ॥ दध १४
द्रत्नान्निदाशुषे ॥ पञ्चरत्नानिनिक्षिपेत् ॥ हिरण्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गर्भः समवर्त्तताग्रेभूतस्यजातःपतिरेकऽआसीत् ॥ सदा धार पृथिवीन्द्यामुतेमाँ कस्मै देवाय हविषा विधेम ॥ इति हिरण्यम् ॥ ॐसुजातो ज्योतिषा सहशर्म वरूथमा सदत्स्वः ॥ वासोऽअग्नेविश्वरूपठं॑ संव्ययस्व विभाव-सो ॥ इतियुग्मवस्त्रेण कलशं वेष्टयेत् ॥ ॐ पूर्णादर्वि परा पतसुपूर्णापुनरापत ॥ वस्नेवविक्रीणा वहाऽइष मूर्ज्जठं॑ शतक्रतो ॥ इतिकलशोपरि पूर्णपात्रं न्यसेत् ॥ ॐतत्वा यामि ब्रह्मणावन्दमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेडमानो वरुणे हवोध्युरुशठं॑ समानऽआयुः प्रमोषीः ॥ इति वरुणं संपूज्य ॥ प्रार्थयेत् ॥ देवदानव संवादे मथ्यमाने महो दधौ ॥ उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वत्तोये सर्वतीर्थानि देवासर्वे त्वयिस्थिता ॥ त्वयि तिष्ठन्ति
तृ० भूतानि त्वयि प्राणाप्रतिष्ठिता ॥ शिवःस्वयं त्वमेवासि विष्णु ग्रा०
१५ स्त्वं च प्रजापतिः ॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपै
तृकाः ॥ त्वयि तिष्ठंति सर्वेपि यतः कामफल प्रदा ॥ त्वत्प्रसादादि
मं यज्ञं कर्तुमीहेजलोद्भव ॥ सानिध्यं कुरु मे देव प्रसन्नो भव सर्वदा
॥ इति प्रार्थना ॥ कलश समीपे श्वेत रक्त कृष्ण पताका क्रमेण स्थाप
येत् ॥ कलशोपरि अग्न्युत्तारण पूर्वक सुवर्ण रौप्य ताम्रमयप्रतिमा
क्रमेणस्थापयेत् ॥ तद्यथा ॥ संकल्पः ॥ देशकालौसंकीर्त्य.
आसु मूर्तिषु अवघातादि दोष परिहारार्थं अग्न्युत्तारणं देवता
सानिध्यार्थं च प्राणप्रतिष्ठां करिष्ये ॥ मूर्त्तिएकस्मिन्पात्रे
निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च पात- १६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

येत् ॥ इमं मंत्रंवारद्वयं सकृद्वाजपेत् ॥ ॐसमुद्रस्यत्वा
वकयाग्ने परिव्ययामसि॥ पावकोऽअस्मभ्यꣳशिवो भव॥
ॐ हिमस्यत्वा जरायुणाग्ने परिव्ययामसि ॥ पावको
ऽअस्मभ्यꣳशिवो भव ॥ ॐ अपामिदं न्ययनꣳसमुद्रस्य
निवेशनम् ॥ अन्न्यांस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्म
भ्यꣳ शिवोभव ॥ ॐ नमस्ते हरसे शोचिषे नमस्तेऽअस्त्व
र्चिषे ॥ अन्न्यांस्तेऽअस्मत्तपन्तु हेतयः ॥ पावकोऽअस्मभ्यꣳ
शिवोभव॥ॐप्राणदाऽअपानदा व्यानदाव्वर्चोदा व्वरिवोदाः॥
अन्न्यांस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो
भव ॥ ५ ॥ एवमग्न्युत्तारणंकृत्वा पञ्चामृतेनसंस्नाप्य
कलशोपरिधृत्वा प्रतिमाहस्तेन संस्पृश्य बीजमंत्रं जपेत् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० तत्रमंत्रः ॥ ॐ आँ ह्रीँ क्रोँ यँ रँ लँ वँ शँ षँ सँ हँ सः आसु श्र०
१६ मूर्तिषु प्राण इहप्राणाः ॥ ॐ आँ ह्रीँ क्रोँ यँ रँ लँ वँ शँ षँ सँ
हँ सः आसु मूर्तिषु जीवइहस्थितः ॥ ॐ आँ ह्रीँ क्रोँ यँ रँ लँ
वँ शँ षँ सँ हँ सः आसुमूर्तिषुसर्वेन्द्रियाणि वाङ्मनस्त्वक्
चक्षुश्रोत्रजिह्वाघ्राण प्राणाः इहागत्य स्वस्तये सुखंचिरं तिष्ठन्तु
स्वाहा ॥ ध्यानम् ॥ अनादिनिधनो देवशंखचक्र धरप्रभुः ॥
अक्षय्य पुण्डरीकाक्ष प्रेतमोक्ष प्रदोभव ॥ प्रथमकलशे ॐ इदं
विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढ मस्यपा ँ सुरे
स्वाहा ॥ इतिविष्णुंस्थापयेत् ॥ अज्ञात नाम गोत्रं सात्विक
प्रेतं विष्णुमयं आवाहयामि ॥ १ ॥ ॐब्रह्मयज्ञानं प्रथमं १६
पुरस्ताद्विषीतमः सुरुच्चोव्वेनऽआवः ॥ सवुध्न्याऽउपमाऽ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्थविष्ठाः शतश्च योनि मशतश्च विवः ॥ अज्ञात नामगोत्रं
राजस प्रेतं ब्रह्ममयं आवाहयामि ॥ इतिद्धितीय कलशे ॥ २ ॥
तृतीयकलशे ॥ ॐनमस्ते रुद्रमन्यवऽउतोतऽइषवेनमः ॥
वाहुभ्या मुततेनमः ॥ अज्ञातनामगोत्रं तामसप्रेतं रुद्रमयं
आवाहयामि ॥ ३ ॥ अस्यै प्राणा प्रतिष्ठन्तु अस्यै प्राणा
दारन्तु च ॥ अस्यैदेवत्वमर्चायै मामहेति च कश्चन ॥ ॐ मनो
जूतिर्ज्जुषता माज्यस्य वृहस्पतिर्यज्ञ मिमंतनोत्वरिष्टं यज्ञठं०
समिमंदधातु ॥ विश्वेदेवासऽइहमा दयन्तामोँप्रतिष्ठ ॥ विष्णु
ब्रह्मरुद्र देवताः सुप्रतिष्ठिताः वरदाः भवत ॥ विष्णुब्रह्मरुद्र
देवताभ्यो नमः ॥ आसनाद्युपचारैःपूजयेत् ॥ स्नानं समर्प
यामि ॥ पञ्चामृतस्नानं स० ॥ शुद्धोदक स्नानं स० ॥ गंधंस

३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० तुलसीपुष्पाणिस० ॥ धूपंआघ्रापयामि ॥ दीपंदर्शयामि श्रा०
नैवेद्यं स० ॥ पुँगीफलं ताम्बूलं स० ॥ दक्षिणां स०॥ प्रदक्षिणा
१७ स० ॥ पुष्पांजलिम् स० ॥ अथप्रार्थना ॥ अनादि निधनोदेव
शंखचक्र धरप्रभुः ॥ अक्षय्यपुण्डरीकाक्ष प्रेत मोक्षप्रदोभव ॥
अतसीपुष्प संकाशं पीतवासं समच्युतम् ॥ ये नमस्यन्ति
गोविन्दं नतेषाँ विद्यते भयम् ॥ कृष्ण कृष्ण कृपालोत्व
मगतीनां गतिर्भव ॥ संसारार्णव मग्नानां प्रसीद परमेश्वर ॥
इतिप्रार्थना ॥ अत्र सूक्तपाठार्थेत्रीन्ब्राह्मणान्वृणुयात् ॥
अस्मिन् त्रिपिण्डी श्राद्धकर्मणि एभिर्वरणद्रव्यैः अमुकामुक
गोत्रंअमुकामुक शर्माणं ब्राह्मणं विष्णु ब्रह्म रुद्रसूक्त पाठकर्तृकं ७
युष्मानहंवृणे ॥ प्रथम कलशे विष्णुसूक्तेनाभिमंत्रणं ॥ ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहस्रशी० ॥ १ ॥ ॐ पुरुषएवेदँ० ॥२ ॥ ॐएतावानस्य० ॥३॥
ॐ त्रिपादूर्ध्व० ॥ ४ ॥ ॐ ततोविराड् ॥ ५ ॥ ॐ तस्म्मा
द्यज्ञात्० ॥ ६ ॥ ॐ तस्माद्यज्ञात्सर्वहुतऋचः ॥ ७ ॥ ॐ
तस्मादश्वा अ० ॥ ८ ॥ ॐ तँयज्ञँ० ॥ ९ ॐ यत्पुरुषं
व्यदधुः ॥ १० ॥ ॐ ब्राह्मणोस्य० ॥ ११ ॥ ॐ चन्द्रमामनसो
॥ १० ॥ ॐ नाभ्याऽआसीदन्त० ११ ॐ यत्पुरुषेण०
॥ १४ ॥ ॐसप्तास्या स० ॥ १५ ॥ ॐ यज्ञेनयज्ञ० ॥ १६ ॥
इति विष्णुसूक्तम् ॥ द्वितीय कलशे ब्रह्मसूक्तेनाभिमंत्रणम्
॥ ॐ तेजोसि शुक्रंमम्मृतमायुष्याऽआयुर्म्मेंपाहि ॥ देवस्यत्वा
सवितुः प्प्रसवेऽश्विनो र्व्वाहुभ्याम्पूष्णोहस्ताभ्यामाददे
॥ १ ॥ ॐ इमामगृभ्णान्नरशना मृतस्य पूर्व्वऽआयुषि विदथे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षु कव्व्या ॥ सानोऽअस्मिन्त्सुतऽआबभूवऽऋतस्य सामन्त्सर
तृ० मारयन्ती ॥ २ ॥ अभिधाऽअसि भुवनमसि यन्तासि धर्त्ता आ०
१८ सत्वमग्निं वैश्वानरꣳ सप्प्रथा सङ्गच्छस्वाहा कृतः ॥ ३ ॥
स्वगात्वा देवेब्भ्यः प्प्रजापतये ब्रह्मन्नश्श्वन्त्स्यामि देवेब्भ्यः
प्प्रजापतये तेनराद्ध्यासम् ॥ तम्बधान देवेब्भ्यः प्प्रजापतये
तेन राध्नुहि ॥ ४ ॥ प्प्रजापतयेत्वा जुष्टम्प्रोक्षामीन्द्राग्नि
ब्भ्यांत्वा जुष्टम्प्रोक्षामि ॥ वायवेत्वा जुष्टम्प्रोक्षामि व्विश्श्वे
ब्भ्याँस्त्वा देवेब्भ्यो जुष्टम्प्रोक्षामि सर्व्वेब्भ्यस्त्वा देवेब्भ्यो जुष्ट
म्प्रोक्षामि ॥ योऽर्व्वन्तञ्जिघाꣳसतितमब्भ्यमीति व्वरुणः ॥ परो
मर्त्तःपरः श्वा ॥ ५ ॥ ॐअग्नये स्वाहा सोमाय स्वाहा
प्रमोदाय स्वाहा सवित्रे स्वाहा व्वायवे स्वाहा विष्णवे स्वाहे १८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय
स्वाहा ॥ ६ ॥ ॐ हिङ्काराय स्वाहा हिङ्कृताय स्वाहा
क्रन्दयते स्वाहा वक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय
स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्ठाय स्वाहो
पविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहा सीनाय
स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूज
ते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृत्ताय
स्वाहा सꣳ हानाय स्वाहोपस्थिताय स्वाहा यनाय स्वाहा
प्रायणाय स्वाहा ॥ ७ ॥ ॐ यते स्वाहा धावते स्वाहो
द्रावाय स्वाहोद्रुताय स्वाहा शूकाराय स्वाहा शूकृताय
स्वाहा निषण्णाय स्वाहोत्थिताय स्वाहा जवाय स्वाहा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० वलाय स्वाहा व्विवर्त्तमानाय स्वाहा व्विवृत्ताय स्वाहा श्रा०
व्विधून्न्वानाय स्वाहा व्विधूतायस्वाहा शुश्रूष
१६ माणाय स्वाहा शृण्वते स्वाहेक्षमाणायस्वाहेक्षिताय
स्वाहा व्वीक्षिताय स्वाहा निमेषाय स्वाहा यदत्ति
तस्म्मै स्वाहा कुर्व्वते स्वाहा कृताय स्वाहा ॥ ८ ॥ ॐ
तत्सवितुर्व्वरेण्यम्भर्गो देवस्य धीमहि ॥ धियो योनः प्रचो
दयात् ॥ ९ ॥ ॐ हिरण्य पाणि मूतये सवितार मुपह्वये ॥
सचेत्ता देवता पदम् ॥ १० ॥ ॐ देवस्य चेततो महीम्प्रसवितु
र्हवामहे ॥ सुमतिर्ठं सत्य राधसम् ॥ ११ ॥ ॐ सुष्टु तिठं.
सुमती बृधो राती ठं सवितुरीमहे ॥ प्रदेवाय मतीविंदे ॥१२॥ १९
ॐ राति ठं. सत्पतिम्महे सवितारमुपह्वये ॥ आस वन्देव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वीतये ॥ १३ ॥ देवस्य सवितुर्म्मतिमासवं विश्व देव्यम् ॥
धिया भगाम्मना महे ॥१४॥ अग्नि ँ स्तोमेन वोधय समि-
धानोऽअमर्त्त्यम् ॥ हव्या देवेषु नो दधत् ॥ १५ ॥ सहव्य
वाड् मर्त्त्यऽउशिगदूतश्चनो हितः ॥ अग्निर्द्धिया समृएवति
॥ १६ ॥ ॐ अग्निन्दूतम्पुरोदधेहव्यवाह मुपब्रुवे ॥
देवा ँ २ ॥ ऽआसादयादिह ॥१७॥ ॐ अजीजनोहि पव
मान सूर्य्यं विधारेश क्यनापयः ॥ गोजीरयार ठं. हमाणः
पुरन्ध्या ॥१८॥ विभूर्म्मात्रा प्प्रभूः पित्राश्श्वो सि हयोस्य त्योसि
मयोरथ र्व्वासि सप्तिरसि वाज्ज्यासि वृषासि नृमणाऽअसि॥
ययुर्न्नामासि शिशुर्न्नामास्या दित्यानाम्पत्वा न्न्विहि देवाऽ
आशा पालाऽएतन्देवेभ्यो श्श्वम्मेधाय प्प्रोक्षित ठं. रक्षते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हरन्ति रिह रमतामिह धृतिरिह स्वधृतिःस्वाहा ॥१९॥ ॐ ॥ श्रा०
नृ० काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहा स्वाहा धिमा
२० धीतायस्वाहा मनः प्प्रजापतये स्वाहा चित्तं विज्ञातायादित्यै
स्वाहा दित्यै मह्यै स्वाहा दित्यै सुमृडीकायैस्वाहा सरस्वत्यै
स्वाहा सरस्वत्यै पावकायै स्वाहा सरस्वत्यै बृहत्यै स्वाहा
पूष्णे स्वाहा पूष्णे प्प्रपत्थ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहा
त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीयाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा
व्विष्णवे स्वाहा व्विष्णवेनिभूयपाय स्वाहा व्विष्णवे शिपि
विष्टाय स्वाहा ॥ २० ॥ ॐ व्विश्श्वो देवस्य नेतुर्म्मर्त्तो
व्वुरीत सक्ख्यम् ॥ व्विश्श्वो रायऽइषुध्यति द्युम्नं वृणीत
पुष्य से स्वाहा ॥२१॥ ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्च्चसीजायता २०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माराष्ट्रे राजन्न्यः शूरइषब्योऽति व्याधी महारथो जायतान्दोग्ध्रीधे
नुर्व्वोढा नड्वा नाशुःसप्तिः पुरन्धिर्य्योषा जिष्णू रथेष्ठाःसभेयो
युवास्य यजमानस्य व्वीरो जायतान्निकामे निकामेनःपर्ज्जन्न्यो
वर्षतुफलवत्योनऽओषधयः पच्यन्तां योग क्षेमो नः कल्पताम्
॥२२॥ ॐ प्राच्यै दिशे स्वाहा पानाय स्वाहा व्यानाय स्वाहा
चक्षुषे स्वाहा श्श्रोत्राय स्वाहा व्वाचे स्वाहा मनसे स्वाहा
॥२३॥ ॐ प्राच्यै दिशे स्वाहा र्व्वाच्च्यैदिशे स्वाहा दक्षि-
णायै दिशे स्वाहा र्व्वाच्च्यै दिशे स्वाहा प्रतीच्च्यै दिशे स्वाहा
र्व्वाच्च्यै दिशे स्वाहोदीच्यै दिशेस्वाहार्व्वाच्च्यै दिशे
स्वहोर्द्ध्वायैदिशे स्वाहा र्व्वाच्च्यै दिशे स्वाहा वाच्च्यै दिशे
स्वाहा र्व्वाच्यै दिशे स्वाहा ॥२४॥ ॐ अभ्द्यःस्वाहा व्वार्भ्यः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा श्रवन्तीभ्यः स्वाहा अ१०
स्यन्दमानाऽभ्यःस्वाहा कूप्याऽभ्यः स्वाहा सूद्याऽभ्यः स्वाहा
२१ धार्य्याभ्यः स्वाहार्णवाय स्वाहा समुद्राय स्वाहा सरिराय
स्वाहा ॥५॥ ऽवाताय स्वाहा धूमाय स्वाहा ऽभ्राय स्वाहा
मेघाय स्वाहा ऽविद्योतमानाय स्वाहा स्तनयते स्वाहा वस्फू-
र्जते स्वाहा वर्षते स्वाहा ऽववर्षते स्वाहोग्रंवर्षते स्वाहा
शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा
प्रुष्णते स्वाहा शीकायते स्वाहा प्रुष्वाभ्यः स्वाहा
ह्रादुनीभ्यः स्वाहा नीहाराय स्वाहा ॥ २६ ॥ ॐ अग्नये
स्वाहा सोमायस्वाहेन्द्राय स्वाहा पृथिऽव्यै स्वाहा २१
न्तरिक्षाय स्वाहा दिवेस्वाहा दिग्भ्यः स्वाहा शाऽभ्यः स्वाहो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा ॥२७॥ ओ३म् नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहा होरात्रेभ्यः स्वाहार्द्धमासेभ्यः स्वाहा मासेभ्यः स्वाहाऽऋतुभ्य स्वाहार्तवेभ्यः स्वाहा संवत्स-राय स्वाहा द्यावापृथिवीभ्यां स्वाहा चंद्राय स्वाहा सूर्य्या-य स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहा दित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥ २८॥ ओ३म् पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवेस्वाहा सूर्य्याय स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा परिप्लवेभ्यः स्वाहा चराचरेभ्यः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वाहा सरीसृपेभ्यः स्वाहा ॥ २९ ॥ ॐ असवे स्वाहा ऽवसवे श्रा०
तृ० वाह ऽविभु वेस्वाहाऽवऽविवस्वते स्वाहा गणश्रियेस्वाहा गणपतये
२२ स्वाहा भिभुवे स्वाहा धिपतये स्वाहा शूषाय स्वाहा सꣳ.
सूर्य्याय स्वाहा चन्द्रायस्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा
दिवापतये स्वाहा ॥३०॥ ॐ मधवेस्वाहा माधवाय स्वाहाशुक्राय
स्वाहाशुचये स्वाहा नभसे स्वाहा नभस्यायस्वाहेषायस्वाहोर्ज्जाय
स्वाहासहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहा
ꣳ हसस्पतये स्वाहा॥३१॥ ऽवाजाय स्वाहा प्रसवाय स्वा-
हा पिजायस्वाहा क्रतवे स्वाहा स्वःस्वाहामूर्ध्न्ये स्वाहा ऽव्यश्नु-
विने स्वाहा न्त्यायस्वाहान्त्याय भौवनायस्वाहा भुवनस्यपतये २२
स्वाहा धिपतयेस्वाहा प्रजापतयेस्वाहा ॥३२ ॥ ॐ आयु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

य्यर्ज्ञेन कल्प्पता ᳬ स्वाहा प्प्राणो यज्ञे नकल्पता ᳬ स्वाहा पानोयज्ञेन कल्प्पता ᳬ स्वाहा व्यानो यज्ञेन कल्प्पता ᳬ स्वाहोदानोयज्ञेन कल्प्पता ᳬ स्वाहा समानो यज्ञेन कल्प्पता ᳬ स्वाहा चक्षुर्यज्ञेन कल्प्पता ᳬ स्वाहा श्श्रोत्रं य्यज्ञेन कल्प्पता ᳬ स्वाहा वाग्यज्ञेन कल्प्पता ᳬ स्वाहा मनोयज्ञेन कल्प्पता ᳬ स्वाहा मात्म्मा य्यज्ञेन कल्प्पता ᳬ स्वाहा ब्रह्मायज्ञेन कल्प्पता ᳬ स्वाहा ज्योति र्यज्ञेन कल्प्पता ᳬ स्वाहा स्वर्यज्ञेन कल्प्पता ᳬ स्वाहा पृष्ठं यज्ञेन कल्प्पता ᳬ स्वाहा यज्ञोयज्ञेन कल्प्पता ᳬ स्वाहा ॥३३॥ ओ३म् एकस्म्मैस्वाहा द्वाब्भ्या ᳬ स्वाहा शताय स्वाहैकतायस्वाहाव्युष्ट्यै स्वाहा स्वर्गाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० स्वाहा ॥ ३४ ॥ इति ब्रह्मसूक्तः ॥ अथरुद्रसूक्तनतृतीय था०
कलशे १६ मंत्राः वारुद्राध्याय नमस्ते॥६६॥ मंत्राःपठेत्॥ ॐ
२३ नमस्ते रुद्रमन्न्यवऽउतोतऽइषवेनमः ॥ वाहुभ्यामुततेनमः ॥
॥ १ ॥ ॐ याते रुद्र शिवातनु रघोरा पापकाशिनी ॥
तया न स्तन्न्वा शन्तमयागिरिशन्ताभिचा कशीहि ॥ २ ॥
ॐ यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे ॥ शिवाङ्गिरित्रता-
ङ्कुरुमाहिंसीः पुरुषञ्जगत् ॥ ३ ॥ ॐ शिवेन व्वचसा त्वा
गिरिशाच्छा व्वदामसि ॥ यथा नः सर्वमिज्जगदयक्ष्मठं सु-
मनाऽअसत् ॥ ४ ॥ ॐ अद्ध्यवोचदधिवक्ताप्प्रथमो
दैव्व्योभिषक् ॥ अहींश्चसर्वा ञ्जम्भयन्तसर्व्वाश्च यातुधान्न्यो २३
धराचीः परासुव ॥ ५ ॥ असौयस्ताम्रोऽअरुणऽउतवभ्रुः सुम-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ङ्गलः ॥ ये चनर्ट॑ रुद्राऽअभितो दिक्षुश्रिताः सहस्रशोवैषा ॐ
हेडऽईमहे ॥ ६ ॥ ॐ असौयोव सर्प्पति नीलग्रीवोविलो-
हितः ॥ उतैन ङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्य्यः सदृष्टो मृडया-
तिनः ॥ ७ ॥ ॐ नमोस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे
अथोयेऽअस्य सत्वानो हन्तेभ्यो करन्नमः ॥ ८ ॥ ॐ प्रमुञ्च
धन्वनस्त्वमुभयो रात्न्र्योज्ज्र्याम् ॥ याश्चतेहस्तऽइषवः पराता
भगवोवप ॥ ९ ॥ ॐ विज्ज्यन्धनुः कपर्द्दिनो विशल्ल्यो
वाण वाँ २ ॥ उत ॥ अने शन्नस्य याऽइषवऽआभुरस्यनिष
ङ्गधिः ॥ १० ॥ ॐ यातेतिम्मींढुष्टमहस्तेवभूवते धनुः
तया स्मान्निश्श्वतस्त्व मयक्ष्मया परिभुज ॥ ११ ॥ ॐ
परिते धन्न्वनो हेति रस्म्मान्न्वृणक्त विश्श्वतः ॥ अथो यूऽ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० इषुधिस्तवारेऽअस्मन्निधेहितम् ॥ ११ ॥ ॐ अवतत्यधनुष्ट्वᳫं श्रा
सहस्राक्षशतेषुधे ॥ निशीर्य्य शल्ल्या नाम्मुखाशिवोनः सुमना
२४ भव ॥ १३ । ॐ नमस्तऽआयुधाया नातताय धृष्णवे उभा-
ब्भ्या मुतते नमो ब्बाहुब्भ्यान्तव धन्न्वने ॥ १४ ॥ ॐ मानो
महान्तमुतमानोऽअर्ब्भकम्मानऽउक्षन्तमुतमानऽउक्षितम् ॥
मानोब्वधीः पितरम्मोतमातरम्मानःप्प्रियास्तन्न्वोरुद्र-
रीरिषः ॥ १५ ॥ ॐ मानस्तोकेतनये मानऽआयु
षमानो गोषु मानोऽश्वेषु रीरिषः ॥ मानो
ब्वीरानुद्र भामिनो ब्वधी र्हविष्मन्तः सदमित्वा हवामहे
॥ १६ ॥ इति रुद्रसूक्तम् वा अध्यायः ॐ नमो हिरण्य २४
बाहवे सेनान्न्ये दिशाञ्च पतये नमो नमो ब्वृक्षेब्भ्यो हरिकेशे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भ्यः पशूनाम्पतये नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमः ॥१७॥ नमो बभ्लुशाय व्याधिनेऽन्नानाम्पतये नमो नमो भवस्य हेत्यै जगताम्पतये नमो नमो रुद्रायाततायिने क्षेत्राणाम्पतये नमो नमः सूतायाहन्त्यै वनानाम्पतये नमः ॥१८॥ नमो रोहिताय स्थपतये वृक्षाणाम्पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनाम्पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणाम्पतये नमो नमऽउच्चैर्घोषायाक्रन्दयते पत्तीनाम्पतये नमः ॥१९॥ नमः कृत्स्नायतया धावते सत्वनाम्पतये नमो नमः सहमानाय निव्याधिनऽआव्याधिनीनाम्पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानाम्पतये नमो नमो निचेरवे परिचरायारण्यानाम्पतये नमः ॥२०॥ नमो वञ्चते परिवञ्चते स्तायूनाम्पतये नमो नमो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृ० निषङ्गिणऽइषुधिमते तस्कराणाम्पतये नमो नमः सृकायिभ्यो अ१०
जिघा ँ सद्भ्यो मुष्णताम्पतये नमो नमोसिमद्भ्यो नक्तञ्च
२५ रद्भ्या ऽविकृन्तानाम्पतये नमः ॥ २१ ॥ नमऽउष्णीषिणे गिरि
चराय कुलुञ्चानाम्पतये नमो नमऽइषुमद्भ्य धन्वायिभ्यश्च
वो नमो नमऽआतन्न्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो
नमऽआयच्छद्भ्यो स्यद्भ्यश्च वो नमः ॥२२॥ नमो विसृजद्भ्यो
विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो
नमः शयानेभ्यऽआसीनेभ्यश्च वो नमोनमस्तिष्ठद्भ्यो धाव
द्भ्यश्च वो नमः ॥२३॥ नमः सभाभ्यः सभापतिभ्यश्च वो
नमो नमोऽश्वेभ्योऽश्व पतिभ्यश्च वो नमो नमऽआव्याधिनी
भ्यो विविद्ध्यन्ती भ्यश्च वो नमो नमऽउगणा भ्यस्तृ ँहती २५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऽभ्यश्च वो नमः ॥ २४ ॥ नमोगणेभ्यो गणपतिभ्यश्च वो
नमो नमो व्रातेभ्यो व्रातपतिभ्यश्चश्वो नमो नमो गृत्सेभ्यो
गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च
वो नमः ॥२५॥ नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो
रथिभ्योऽअरथेभ्यश्च वो नमो नमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च
वो नमो नमो महद्भ्योऽअर्भकेभ्यश्च वो नमः ॥२६॥ नमस्तक्ष
भ्योरथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च
वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनि-
भ्यो मृगयुभ्यश्च वो नमः ॥२७॥ ॐ नमःश्वभ्यः श्वपति
भ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च
पशुपतयेचनमोनीलग्रीवायचशितिकण्ठायच॥२८॥ॐनमःकपर्द्दिने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च व्युप्प्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो
तृ० गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषु मते च श्रा०
२६ ॥२९॥ ॐ नमोह्रस्वाय च वामनाय च नमो बृहते च वर्षीय
से च नमो वृद्धाय च सवृधे च नमोग्र्याय च प्रथमाय च
॥३०॥ ॐ नमऽआशवे चाजिराय च नमः शीघ्रयाच शीभ्याय
च नमऽऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय
च ॥३१॥ ॐ नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय
चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय
च बुध्न्याय च ॥३२॥ ॐ नमः सोभ्याय च प्रतिसर्याय च
नमो याम्याय च क्षेम्याय च नमः श्लोक्याय चाव २६
सान्याय च नमऽउर्वर्याय च खल्याय च ॥३३॥ नमो वन्याय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चकद्याय च नमः श्रवाय च प्रतिश्रवाय च नमऽआशुषे-
णाय चाशुरथाय च नमः शूराय चावभेदिने च ॥ ३४ ॥
ॐ नमो विल्मिने च कवचिने च नमो वर्म्मिणे च वरू-
थिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय
चाहनन्न्यायच ॥३५॥ ॐ नमो धृष्णवे च प्रमृशाय च नमो
निषंगिणे चेषुधीमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वा
युधाय च सुधन्न्वने च ॥३६॥ ॐ नमः स्रुत्यायच पथ्याय
च नमः काट्यायच नीप्याय च नमः कुल्ल्याय च सरस्याय
च नमो नादेयाय च वैशन्ताय च ॥३७॥ ॐ नमः कूप्याय
चावट्याय च नमो वीध्र्याय चातप्याय च नमो मेघ्याय
च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च ॥३८॥ ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमो ऽव्वात्याय च रेष्म्याय च नमो ऽव्वास्तव्व्याय च ऽव्वास्तु श्रा०
रु० पाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च
॥३९॥ ॐ नमः शंगवे च पशुपतये च नमः उग्राय च भीमाय
२७ च नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च
नमो ऽवृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ॥४०॥ ॐ नमः
शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च
नमः शिवाय च शिवतराय च ॥४१॥ ॐ नमः पार्य्याय चावा
र्य्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च
कूल्ल्याय च नमः शष्प्याय च फेन्न्याय च ॥४२॥ ॐ नमः
सिकत्त्याय च प्रवाह्याय च नमः किंशिलाय च क्षयणाय
च नमः कपर्द्दिने च पुलस्तये च नमऽइरिण्याय च प्रपथ्याय च २७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥४३॥ ॐ नमो व्व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च
गेह्याय च नमो हृद्याय च निवेष्प्याय च नमः काट्याय च
गह्वरेष्ठाय च ॥४४॥ ॐ नमः शुष्क्याय च हरित्याय च नमः पाᳫं
सव्याय च रजस्याय च नमो लोप्यायचोलप्याय च नमऽऊ
र्व्व्याय च सूर्व्याय च ॥४५॥ ॐ नमः पर्णाय च पर्णशदाय च
नमऽउद्गुरमाणाय चाभिघ्नते च नमः आखिदते च प्रखि
दते च नमः इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिके
भ्यो देवानाᳫं हृदयेभ्यो नमो विचिन्न्वत्केभ्यो नमो वि
क्षिणत्केभ्यो नमऽआनिर्हतेभ्यः ॥ ४६ ॥ ॐ द्रापेऽअन्ध
सस्पते दरिद्र नील लोहितः ॥ आसाम्प्रजानाम्मेषाम्पशूना
म्माभेर्म्मारोङ्मोचनः किञ्चनाममत् ॥४७॥ ॐ इमारुद्राय तवसे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० कपर्द्दिने क्षयद्वीरायप्प्रभरा महेमतीः ॥ यथा शमसद्द्विपदे च श्रा०
२८ तुष्पदे विश्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ ॐ याते
रुद्र शिवा तनूः शिवा ऽविश्वाहाभेषजी॥ शिवा रुतस्य भेषजी
तथानो मृड जीवसे ॥४९॥ ॐ परिनो रुद्रस्य हेतिर्व्वृणक्तु
परित्वेषस्य दुर्म्मतिरघायोः ॥ अवस्थिरामघवद्भ्यस्तनुष्व
मीढ्वस्तोकाय तनयाय मृड ॥ ५० ॥ ॐ मीढुष्टमशिवतम
शिवोनः सुमना भव ॥परमेव्वृक्षऽआयुधन्निधाय कृत्तिं ऽवसानऽ
आचर पिनाकम्बिभ्रदा गहि ॥५१॥ विकिरिद्द्रविलोहित
नमस्तेऽअस्तु भगवः ॥ यास्ते सहस्रठं. हेतयोन्न्यमस्म्मन्निव
पन्तुताः ॥५२॥ ॐ सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ॥ २८
तासामीशानो भगवः पराचीना मुखा कृधि ॥५३॥ ॐ अस

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ङ्ख्याता सहस्राणि ये रुद्राऽअधिभूम्याम्॥तेषा ँ सहस्रयोजनेव
धन्न्वानितन्न्मसि ॥ ५४ ॥ ॐअस्मिन्महत्यर्णवेऽन्तरिक्षे
भवाऽअधि ॥ तेषा ँ सहस्रयोजनेवधन्वानितन्मसि ॥५५॥
ॐ नीलग्ग्रीवाः शितिकण्ठादिव ँ रुद्राऽउपाश्रिताः ॥ तेषा
ँ सहस्रयोजनेवधन्वानितन्मसि ॥ ५६ ॥ ॐ नीलग्ग्रीवाः
शिति कण्ठाः शर्व्वाऽ अधः क्षमाचराः ॥ तेषा ँ सहस्रयोजनेव
धन्वानितन्मसि ॥ ५७ ॥ ॐयेव्वृक्षेषु शष्पिञ्ज्जरा नील
ग्ग्रीवा व्विलोहिताः ॥ तेषा ँ सहस्रयोजनेवधन्वानितन्मसि
॥५८॥ ॐ ये भूतानामधिपतयो व्विशिखासः कपर्दिनः ॥
तेषा ँ सहस्र योजनेवधन्वानितन्मसि ॥ ५९ ॥ ॐ ये
पथाम्पथि रक्षयऽऐलवृदाऽआयुर्य्युधः॥ तेषा ँ सहस्रयोजनेव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धन्न्वा नितन्मसि ॥६०॥ ॐ ये तीर्थानि प्पचरन्ति सृका श्रा०
०२ हस्ता निषंगिणः ॥ तेषा ँ सहस्रयोजने वधन्वा नितन्मसि
२९ ॥६॥ ॐ येन्नेषु व्विविद्धयन्ति पात्रेषुपिबतो जनान् ॥ तेषा
ँ सहस्रयोजने वधन्वा नितन्मसि ॥६२॥ ॐ यऽएतावन्तश्च
भूया ँ सश्चदिशो रुद्रा व्वितस्थिरे ॥ तेषा ँ सहस्रयोजने व
धन्न्वा नितन्न्मसि ॥६३॥ ॐ नमोस्तु रुद्रेभ्योये दिवियेषां
वर्षमिषवः । तेभ्यो दशप्प्राचीर्दशदक्षिणादशप्प्रतीचीर्दशो
दीचीर्दशोद्ध्र्वाः । तेभ्यो नमोऽअस्तुतेनोवन्तुतेनो मृडयन्तु ते
यन्द्विष्मो यश्चनो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः ॥ ६४ ॥ २६
ॐ नमोस्तु रुद्रेभ्यो येन्तरिक्षेयेषां व्वातऽइषवस्तेभ्यो दश
प्प्राची र्दशदक्षिणा दश प्रतीचीर्दशोदीचीर्दशोद्ध्र्वाः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेभ्यो नमोऽअस्तु तेनो वन्तुतेनो मृडयन्तु ते यद्विष्मो यश्चनो द्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥६५॥ ॐ नमोस्तु रुद्रेभ्यो ये पृथिव्यां य्येषामन्न मिषवः । तेभ्यो दशप्प्राचीर्दश दक्षिणा दश प्प्रतीचोर्दशोदीचीर्दशोद्ध्वाः ॥ तेभ्यो नमो ऽस्तु तेनो वन्तु तेनो मृडयन्तु ते यन्द्विष्मो यश्चनो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः ॥६६॥ इति रुद्राध्यायः ॥

ततो कलशानामग्रे चटत्रयमुदङ्खं स्थापनम् ॥ अपसव्यम् ॥ मोटक यव जलान्यादाय अज्ञात नामगोत्राः सात्विक प्रेताः दिविस्थाः विष्णु मयाः त्रिपिण्डी श्राद्धे इदमा सन्नं वो मया दीयँते युष्माकमुपतिष्ठन्ताम् ॥१॥ पुन मोटक तंदुल जलान्यादाय ॥ अज्ञात नामगोत्राः राजसप्रेताः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्तरिक्षस्थाः ब्रह्ममयाः त्रिपिण्डीश्राद्धे इदमासनं वो मया
तृ० दीयंते युष्माकमुपतिष्ठन्ताम् ॥२॥ पुनर्मोटक तिलजलान्या श्रा०
३० दाय ॥ अज्ञातनामगोत्राः तामसप्रेताः भूमिस्थाः रुद्रमयाः
त्रिपिण्डीश्राद्धे इदमासनं वो मया दीयंते युष्माकमुपतिष्ठ
न्ताम् ॥३॥ भोजनपात्रे क्रमेण यवाक्षत तिलान्विकिरेत् ॥
ॐ यवोसि यवया स्म द्वेषो यवया रातीः । इति प्रथमपात्रे
यवान् ॥१॥ ॐ अक्षन्नमीमदन्त ह्यवप्रिया ऽअधूषत ।
अस्तोषत स्वभानवो विप्रानविष्ठायामतीयोजान्न्विन्द्रते हरि ॥
इति द्वितीयपात्रेऽक्षतान् । ॐ अपहता ऽ असुरा रक्षा ँ सि
व्वेदिषद ॥ इतितृतीय पात्रे तिलान् ॥३॥ ततोऽर्घपात्र त्रय
करणम् ॥ ॐ पवित्रेस्थो वैष्णव्व्यौसवितुर्व्वः प्रसव ऽउत्पुनाम्य ३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः॥ तस्यते पवित्रपते पवित्र पूतस्य यत्कामः पुने तच्छकेयम्॥इतिपवित्रम्॥ ॐ शन्नोदेवी रभिष्टयऽ आपो भवन्तु पीतये॥ शँय्योरभि स्त्रवन्तुनः इति जलम् ॐ यवोसि यवयास्म्म द्वेषो यवया रातीः॥ इति यवान्॥ ॐ अहन्न मीमदन्तेति अहतान् ॐ तिलोसि सोम देवत्यो गोसवो देव निर्मितः॥प्रक्त्न मद्भिः प्रक्त्नःस्वधया पितॄँ ल्लोकान्प्रीणाहिनः स्वाहा॥ इतितिलान्॥ गंध पुष्पेतुलसी तूष्णीं क्रमसः क्षिपेत्॥ अर्घपात्रं वाम हस्ते कृत्वा पवित्रं भोजन पात्रे उत्तराग्रन्धृत्वा तदुपरि किञ्चिदुदकान्तरं दत्वा॥ अर्घपात्रं दक्षिण हस्तेनाच्छाद्य॥ ॐ या दिव्याऽ आपःपयसा संवभूवुर्य्याऽअन्तरिक्षाऽउत व्यार्थिंवीर्य्याः हिरण्य वर्णा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यज्ञिया स्तानऽआपः शिवा स ᳪ स्योना सुहवा भवन्तु ॥ इति
तृ० पठित्वा ॥ मोटक यव जलान्यादाय ॥ अज्ञात नाम गोत्राः
सात्विक प्रेताः दिविस्थाः विष्णुमया त्रिपिण्डीश्राद्धे एष
३१ हस्तार्घो वो मया दीयँते युष्माकमुपतिष्ठन्ताम् ॥१॥ द्वितीयार्घ
पात्रं वामहस्ते कृत्वा पवित्रे भोजन पात्रे उत्तराग्रं धृत्वा
तदुपरि किञ्चिदुदकान्तरं दत्वा अर्घपात्रं दक्षिण हस्ते
नाच्छाद्य ॥ ॐ यादिव्येति पठित्वा ॥ मोटक तंदुल जलान्या
दाय ॥ अज्ञात नामगोत्राः राजसप्रेताः अन्तरिक्षस्थाः
ब्रह्ममयाः त्रिपिण्डीश्राद्धे एषहस्तार्घो वो मया दीयँते
युष्माकमुपतिष्ठन्ताम् ॥ २ ॥ तृतीयार्घपात्रं वाम हस्ते ३१
कृत्वा पवित्रे भोजन पात्रे उत्तराग्रं धृत्वा ॥ तदुपरि किञ्चि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुदकान्तरं दत्वा ॥ अर्घपात्रं दक्षिण हस्तेनाच्छाद्य ॐयादिव्येतिपठित्वा ॥ मोटकतिलजलान्यादाय ॥ अज्ञात नामगोत्रा तामसप्रेताः भूमिस्थाः रुद्र मयाः त्रिपिण्डी श्राद्धे एष हस्तार्घो वो मयादीयँते युष्माक मुपतिष्ठन्ताम् ॥३॥ सात्विक आसन वामपार्श्वे उत्तानमेव अर्घपात्रं निधाय ॥ सात्वि केभ्यः प्रेतेभ्यो विष्णुमयेभ्यः स्थान मसि ॥ राजसेभ्यः प्रेते भ्यो ब्रह्ममयेभ्यः स्थानमसि ॥ तामसेभ्यः प्रेतेभ्यो रुद्रमयेभ्यः स्थान मसि ॥ गंधादिदानम् । क्रमेण श्वेत रक्त कृष्ण दद्यात् ॥ मोटक यव जलान्यादाय ॥ अज्ञात नाम

टि १ अनामिकयाव देवस्य ऋषीणांचतथैवच । गंधानुलेपनंक यँ प्रयत्नेन विशेषतः॥ पितृणामर्पयेद्गन्धं तर्जन्यां च सदैव हि॥ तथैव मध्यमाङ्गुल्या गन्धं धार्य्यं स्वयं बुधैः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृ० गोत्राः सात्विक प्रेताः दिविस्थाः विष्णुमयाः त्रिपिण्डी श्राद्धे श्रा०
एतानि गंध पुष्प धूप दीप ताम्बूल यज्ञोपवीत वासांसि वो मया
३२ दीयन्ते युष्माकमुपतिष्ठन्ताम् ॥१॥ मोटकाक्षत जलान्यादा
य ॥ अज्ञात नाम गोत्राः राजस प्रेताः अन्तरिक्षस्थाः ब्रह्ममयाः
त्रिपिण्डी श्राद्धे एतानि गंधादीनि वो मया दीयन्ते युष्माक
मुपतिष्ठन्ताम् ॥२॥ मोटक तिल जलान्यादाय ॥ अज्ञात नाम गोत्राः
तामस प्रेताः भूमिस्थाः रुद्रमयाः त्रिपिण्डी श्राद्धे एतानि गंधादीनि
वो मया दीयन्ते युष्माकमुपतिष्ठन्ताम् ॥३॥ मण्डल करणम् ॥
यथा चक्रायुधो विष्णुस्त्रैलोक्यं परि रक्षतु ॥ एवं मण्डल
तोयं तु सर्वभूतानि रक्षतु ॥ पृथक् पृथक् कुर्यात् ॥ भूस्वामिने ३२
न्नं दद्यात् ॥ इदमन्नं एतद्भूस्वामि पितृभ्यो नमः ॥ ततो भोजन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भोजन पात्रे अन्न परिवेषणं कुर्यात् ॥ पुटके जलं घृतं चो
पनीय ॥ अन्नोपरि हस्तद्वयेन मधुंदत्वा ॥ ॐ मधुव्वाता
ऋतायते मधुक्षरन्ति सिन्धवः माध्वीर्न्नः सन्त्वोषधीः मधुनक्त
मुतोषसो मधुमत्पार्थिव ꣳ रजः मधुद्यौ रस्तुनः पिता ।
मधुमान्नो ऽवनस्प्पतिर्म्मधुमाँ ॥२॥ ऽअस्तु सूर्य्यः माध्वीर्ग्गा-
वो भवन्तुनः ॥ पात्रालम्भः व्यस्ते पाणिभ्याम् ॥ ॐ पृथि-
वीते पात्रं द्यौरपि धानं ब्राह्मणस्य मुखे अमृते अमृतं जु
होमि स्वाहा ॥ ॐ इदं विष्णुर्व्विचक्रमे त्रेधा निदधे पदम् ॥
समूढमस्य पा ꣳ सुरे स्वाहा ॥ ॐ कृष्णकव्य मिदंरक्ष

टि०—१ केचिन्मते देव सम्बन्धात् व्यस्तपाणि स्थाने उत्तान पाणिभ्यां पात्रा लम्भः इति ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मिदमदीयम् ॥ इति पठित्वा ॥ अङ्गुष्ठसावेश्य ॥ इदमन्नं श्रा०
तृ० इमाआपः इदमाज्यम् ॥ इदंहविः ॥ ॐ यवोसि यवयास्म्म
॥३३॥ द्वेषो यवया रातीः ॥ इतियवान् ॥ मोटक यव जलान्यादाय
अज्ञात नामगोत्राः सात्विक प्रेताः दिविस्थाः विष्णुमयाः
त्रिपिण्डी श्राद्धे इद मन्नं सोपकरणं वो मया दीयते युष्माक
मुपतिष्ठन्ताम् ॥ १ ॥ द्वितीयपात्रे ॥ ॐ पृथिवी ते पात्रं० ॥
ॐ इदं विष्णुर्विचक्रमे० ॥ ॐ कृष्ण हव्य० ॥ अङ्गुष्ठसावे
श्य ॥इदमन्नम् ॥ इमा आपः ॥ इदमाज्यम् ॥ इदंहविः ॐ
अत्तन्नमी मदन्त० ॥ भोजनपात्रे अक्षतान् क्षिपेत् ॥ मोटका
क्षत जलान्यादाय ॥ अज्ञात नामगोत्राः राजसप्रेताः
अन्तरिक्षस्थाः ब्रह्ममयाः त्रिपिण्डी श्राद्धे इदमन्नं सोप ॥३३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करणं वो मयादीयते युष्माकमुपतिष्ठन्ताम् ॥ २ ॥
तृतीय पात्रे ॥ ॐ पृथिवीते पात्रं० ॥ ॐ कृष्णाहव्य० । इति
पठित्वा ॥ ततो अङ्गुष्ठसावेश्य ॥ इदमन्नं ॥ इमा आपः ॥
इदमाज्यम् ॥ इदंहविः ॥ ॐ अप हता० ॥ इतितिला-
न्विकीर्य ॥ मोटक तिल जलान्यादाय ॥ अज्ञात नाम गोत्राः
तामस प्रेताः भूमिस्थाः रुद्रमयाः त्रिपिण्डी श्राद्धे इदमन्नं
सोपकरणं वो मया दीयते युष्माकमुपतिष्ठन्ताम् ॥ ३ ॥
अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ॥ तत्सर्वं
मच्छिद्रमस्तु ॥ गायत्रीं त्रिर्जपेत् ॥ ॐ मधुवाता इति जपेत्
अथ रक्षोघ्नी सूक्तम् ॥ कृणुष्व पाजः प्रसितिन्न पृथिवीं
याहि राजे बाम वां २ ॥ ऽइभेन ॥ तृष्वीमनुप्रसिति न्द्रूणा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० नोस्तासि विद्धय रक्षसस्त पिष्ठैः ॥ १ ॥ ॐ तवभ्रमास
३४ ऽआशुया पतन्त्यनुस्पृश धृषता शोशुचानः ॥ तपू ँ ष्य श्रा०
ग्ने जुह्वा पतङ्गा न सन्दितो विसृज बिष्वगुल्काः ॥ २ ॥
ॐ प्रतिस्पशो विसृज तूर्णि तमो भवा पायु र्विशोऽअस्या
ऽअदब्धः॥ योनो दूरेऽअघश ँ सोयोऽअन्त्यग्ने मा किष्टे व्य
थिरा दधिर्षीत् ॥३॥ ॐ उदग्ने तिष्ठ प्रत्या तनु ष्वन्न्य
मित्राँ २ ॥ऽओषता तिग्महेते ॥ योनोऽअराति ँ समिधा न
चक्रे नीचा तन्धक्ष्यत सन्नशुष्कम् ॥ ४ ॥ ॐ ऊर्द्ध्वोभव
प्रति विद्ध्या ध्यस्मदा विष्कृणुष्व दैव्या न्यग्ने ॥
अवस्थिरा तनुहि यातु जूनाञ्जामि मजामिम्प्रमृणीहि शत्रून्
अग्नेष्ट्वा तेजसा सादयामि ॥ ५ ॥ भूमौतिलान्विकीर्य ॥ ॥३४।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ उदीरता मवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः ॥
असुं यऽईयुरवृकाऽऋतज्ञा स्तेनोवन्तु पितरो हवेषु ॥ १ ॥
ॐ सहस्र शीर्षा षोडशर्चः १६ पठेत् ॥ ॐ आशुः शिशानो
वृषभो न भीमो घना घनः क्षोभणश्चर्षणी नाम् ॥ सङ्क्रन्दनो
निमिष एक वीरः शत ँ सेनाऽअजयत्साकमिंद्रः ॥ १ ॥
ॐ सङ्क्रन्दने नानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन
धृष्णुना ॥ तदिन्द्रेण जय ततत्सहद्ध्वं युधो नरऽइषु हस्तेन
वृष्णा ॥ २ ॥ ॐ सऽइषु हस्तैः सनिषङ्गिभिर्वशीस ँ स्रष्टा
सयुधऽइन्द्रो गणेन ॥ स ँ सृष्ट जित्सोमपा बाहु
शर्द्ध्युग्र धन्न्वा प्रतिहिता भिरस्ता ॥ ३ ॥ ॐ वृहस्पप
ते परिदीया रथेन रक्षोहा मित्रा ँ ॥२॥ अपवाध मानः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्प्रभञ्जन्त्सेनाः प्रमृणो य्युधा जयन्नस्म्माक मेद्ध्यविता रथा
नाम् ॥ ४ ॥ ॐ वल विज्ञा यस्थविरः प्प्रवीरः सह स्वान्ॅवा
जी सहमानऽउग्ग्रः ॥ अभिवीरोऽअभिसत्वा सहोजा जैत्र
ऽमिन्द्र रथमातिष्ठ गोवित् ॥ ५ ॥ ॐ गोत्रभिदङ्गोविदं
ॅवज्ज्र वाहुञ्जयन्त मज्ज्म प्प्रमृणन्तमोजसा ॥ इम ँ सजाता
अनु वीरयद्ध्व मिन्द्र ँ सखायोऽअनुस ँ रभद्ध्म् ॥ ६ ॥
ॐ अभिगोत्राणि सहसा गाहमानो दयोॅवीरः शतमन्न्यु
रिन्द्रः ॥ दुश्च्यवनः पृतना षाड युद्ध्योस्म्मा क ँ सेनाऽअव
तु प्प्रयुत्सु ॥ ७ ॥ ॐ इन्द्रऽआसान्नेता बृहस्प्पतिर्द्दक्षिणा
यज्ञः पुरऽएतु सोमः ॥ देवसेना नामभिभञ्जतीनाञ्जयन्ती
ना म्मरुतो यन्त्वग्ग्रम् ॥ ८ ॥ ॐ इन्द्रस्य वृष्णो ॅवरुणस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राज्ञऽआदित्यानां म्मरुतां ँ शर्द्धंउग्ग्रम् ॥ महा मनसा म्भुवन च्च्यवानाङ्घोषो देवानांञ्जयता मुदस्थात् ॥ ९ ॥ ॐ उद्धर्षय मघवन्नायुधान्न्युत्सत्व नाम्मा मकानाम्मनां ँसि ॥ उद्वृत्त्र हन्न्वाजिनां वाजिना न्न्युद्रथानाज्जयतां यन्तुघोषाः ॥ १० ॥ ॐ अस्म्माकमिन्द्रः समृतेषु ध्वजेष्वस्म्माकञ्जाऽइषवस्ताजयन्तु ॥ अस्म्माकं व्वीराऽउत्तरे भवन्त्वस्म्माँ २ ॥ उदेवाऽअवता हवेषु ॥ ११ ॥ ॐ अमीषाञ्चित्तम्प्रति लोभयन्ती गृहाणाङ्गा न्न्यप्पवे परेहि ॥ अभिप्प्रेहि निर्दह हृत्सुशोकै रन्धेनामित्त्रा स्तमसा सचन्ताम् ॥ १२ ॥ इतिपठेत् ॥ उच्छिष्ट समीपे कुशोपरि अन्नं विकिरेत् ॥ अनग्नि दग्धाश्च ये जीवा ये प्रदग्धा कुले मम ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० भूमौ दत्तेन तृप्यन्तु तृप्तायान्तु पराङ्गतिम् ॥ पवित्र मोटकौ श्रा०
॥३४॥ तत्रैव त्यागः ॥ हस्तौपादौ प्रक्षाल्य सव्यं आचाम्य हरिं
स्मृत्वा गायत्रीं ३ मधुव्वाता ३ इति जपेत् ॥ अपसव्यम्
प्रादेशमात्रं वदिका त्रयं निर्माय कुशानादाय ॥ ॐ अपहताऽ
असुरा रक्षा ᳪ सिव्वेदिषद इति त्रिषु वेदिकासु रेखा करणम्
कुशानामुत्तरतः त्यजेत् ॥ ॐ येरूपाणि प्रतिमुञ्च मानाऽ
असुरा सन्तः स्वधया चरन्ति ॥ परापुरोनिपुरोये भरन्त्य
ग्निष्टाँ २ ल्लोकां न्प्रणुदात्यस्मात् ॥ इति त्रिषु रेखोपरि
अङ्गारं भ्रामयित्वा अङ्गारं दक्षिणतः त्यजेत् ॥ रेखोपरि

टि०—१ अनग्नि दग्धेति पाठः यजुर्विदाम् ॥ सामगानान्तु अग्नि दग्धेति पाठो युक्तः ॥

२ प्रदग्धेति द्विजातीयानांमप्य पाठस्तु शूद्राणाङ्ग्हेति निगदख्यातम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सञ्कूलून कुशास्तरणम् ॥ एवं त्रिषुस्थानेषु कुर्यात् ॥
सव्यम् ॥ ॐ देवताभ्यः पितृभ्यश्च महा योगीभ्यऽएवच ॥
नमः स्वाहायै स्वधायै नित्य मेव नमो नमः इति त्रिः जपेत्
अपसव्यम् ॥ पुटकत्रये क्रमेण जल तंदुल तिल गंध पुष्पा
णी प्रक्षिपेत् ॥ पुटकंवाम हस्तेनादाय दक्षिण हस्ते मो
टक यवजलान्यादाय ॥ अज्ञात नाम गोत्राः सात्विक प्रेताः
दिविस्थाः विष्णुमयाः त्रिपिण्डी श्राद्धे पिण्डस्थाने
अत्रावने निग्ध्वं वो मया दीयते युष्माकमुपतिष्ठन्ताम्
द्वितीय पुटकमभादाय । मोटकाक्षतजलान्यादाय अज्ञात नाम
गोत्राः राजसप्रेताः अन्तरिक्षस्थाः ब्रह्ममयाः त्रीपिण्डी श्राद्धे
पिण्डस्थाने अत्रावनेनिग्ध्वंवोमया दीयते युष्माक मुपतिष्ठन्ताम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० तृतीय पुटकमादाय ॥ मोटक तिल जलान्यादाय ॥ अज्ञात श्रा०
॥३७॥ नामगोत्राः तामस प्रताः भूमिस्थाः रुद्रमयाः त्रिपिण्डी श्राद्धे
पिण्ड स्थाने अत्रावने निःध्वं वो मया दीयते युष्माक
मुपतिष्ठन्ताम् ॥ ३ ॥ ततो क्रमेण यवादि पिष्टेषु तिल
दुग्ध मधु घृत शर्कराद्य संयोज्य पिण्ड त्रयं च निर्माय ॥ प्र
थम यव पिण्डमादाय मोटक यवजलान्यादाय ॥ पितृवंशे
मृतायेच मातृ वंशे तथैवच ॥ गुरु स्वशुर वन्धूनां ये चान्ये
बाँधवास्मृताः ॥ येमे कुले लुप्त पिण्डाः पुत्र दार विवर्जिताः
क्रियालोप गताश्चैव जात्यन्धाः पङ्गवस्तथा ॥ विरूपा आम
गर्भाश्च ज्ञाता ज्ञात कुले मम ॥ धर्मपिण्डो मया दत्तो अक्षय्य
मुपतिष्ठताम् ॥ इदं यवमयं पिण्डं यवसर्पि समन्वितम् ॥ ॥३७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ददामि तस्मै प्रेताय यःपींडां कुरुते मम ॥ ये केचि त्प्रेतरूपे
ण वर्त्तन्ते पितरो मम ॥ यवपिण्डप्रदानेन तृप्तिं गच्छन्तु
शास्वतीम् ॥ ये केचिद्दिवि तिष्ठन्ति प्रेताः सात्विक रूपिणाः
सात्विकपिण्ड प्रदानेन तृप्तिंगच्छन्तु तेत्तयाम् ॥ अज्ञातनाम
गोत्राः सात्विक प्रेताः दिविस्थाः विष्णुमयाः त्रिपिण्डी
श्राद्धे एष यवमयं पिण्डो वो मया दीयते युष्माकमुपतिष्ठन्ताम्
॥१॥ द्वितीये व्रीहिमयं पिण्डमादाय ॥ मोटकान्तत जलान्या
दाय ॥ पितृवंशे मृतायेचमातृवंशे तथैव च ॥ गुरु स्वशुर वंधूनां
ये चान्ये वाँधवा स्मृताः ॥ येमे कुले लुप्तपिण्डाः पुत्रादार
विवर्जिताः ॥ क्रिया लोप गताश्चैव जात्यंन्धाः पङ्गव स्तथा॥
विरूपा आमगर्भाश्च ज्ञाताज्ञात कुले मम ॥ धर्मपिण्डो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मया दत्तो अक्षय्यमुपतिष्ठताम् ॥ इदं व्रीहिमयं पिण्डं
मधुर त्रय संयुतम् ॥ तन्मुक्तये प्रयच्छामि पीडां ये कुर्वते
मम ॥ येकेचित्प्रेतरूपेण वर्तन्ते पितरो मम ॥ तंदुल पिण्ड
प्रदानेन व्रजन्तु गतिमुत्तमाम् ॥ अन्तरिक्षे च ये जाता राज
सा वायु रूपिणः ॥ राजस पिण्ड प्रदानेनते तृप्यन्तु
मुदान्विताः ॥ अज्ञात नामगोत्राः राजसप्रेताः अन्तरिक्ष
स्थाः ब्रह्ममयाः त्रिपिण्डी श्राद्धे एषव्रीहि मयं पिण्डो वो
मया दीयते युष्माकमुप तिष्ठन्ताम् ॥ २ ॥ तृतीय तिल
मयं पिण्डमादाय ॥ मोटक तिल जलान्यादाय ॥ पितृ
वंशेमृतायेच मातृवंशे तथैवच ॥ गुरुश्वशुर बन्धूनां येचान्ये
बान्धवास्मृताः ॥ येमे कुले लुप्त पिण्डाः पुत्रदार विवर्जिताः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रिया लोप गताश्चैवजात्यन्धा पङ्गवस्तथा ॥ विरूपा आम गर्भाश्च ज्ञाताज्ञात कुलेमम ॥ धर्म पिण्डो मया दत्तो अक्षय्य मुपतिष्ठताम् ॥ इमं तिलमयं पिण्डं मधुना सर्पिषा युतं ॥ तेभ्यो ददामि प्रेतेभ्यः ये पीडां कुर्वते सदा ॥ येकेचित्तामसा प्रेताः भूमौ तिष्ठन्ति सर्वदा ॥ तिलपिण्ड प्रदानेन गतिं गच्छन्तु तेध्रुवाम् ॥ तमो रूपा श्वयेकेचिद्वर्त्तन्ते पितरो मम ॥ पिण्याक पिण्ड दानेन ते तृप्यन्तु क्षुधार्दिताः ॥ अज्ञात नाम गोत्राः तामस प्रेताः भूमिस्थाः रुद्रमयाः त्रिपिण्डी श्राद्धे एषा तिल मयं पिंडो वो मया दीयते युष्माक मुपतिष्ठन्ताम् ॥ ३ ॥ त्रिषु अवनेजनस्थानेषु पिण्डं दद्यात् ॥ कुशमूले करंप्रोन्दय सव्यं आचम्य हरिंस्मृत्वा ॥ अपसव्यम् ॥ उत्तरा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भिमुखीभूय स्वासं नियम्य ॥ अत्रपितरो मादयध्वं यथा
भाग मावृषायध्वम् ॥ दक्षिणाभिमुखंत्यजेत् ॥ अमी
मदन्त पितरो यथा भागमावृषा यिषत् ॥ प्रथमावनेजन
पात्र मादाय ॥ मोटक यवजलान्यादाय ॥ अज्ञात नाम
गोत्राः सत्विक प्रेताः दिविस्थाः विष्णुमयाः त्रिपिण्डी श्राद्धे
पिण्डेऽत्र प्रत्यवने निग्ध्वं वो मया दीयते युष्माक मुपतिष्ठ
न्ताम् ॥१॥ द्वितीयावने जन पात्रमादाय ॥ मोटकाक्षतजला
न्यादाय ॥ अज्ञात नाम गोत्राः राजसप्रेताः अन्तरिक्षस्थाः
ब्रह्ममयाः त्रिपिण्डी श्राद्धे पिण्डेऽत्राप्रत्यवने निग्ध्वं वो मया
दीयते युष्माकमुपतिष्ठन्ताम् ॥ २ ॥ तृतीयावनेजनपात्र
मादाय ॥ मोटक तिल जलान्यादाय ॥ अज्ञात नाम गोत्राः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तामस प्रेताः भूमिस्थाः रुद्रमयाः त्रिपिण्डी श्राद्धे पिण्डेऽत्रप्रत्यव
ने निग्ध्वं वो मया दीयते युष्माक मुपतिष्ठन्ताम् ॥ ३ ॥
इति पिंण्डोपरि अवनेजनं दद्यात् ॥ ततो नीवींविस्रंस्य ॥
सव्येनाचम्य ॥ सव्यम् ॥ सूत्रमादाय ॥ ॐ नमोवः पितरो
रसाय नमोवः पितरः शोषाय नमोवः पितरो मन्न्यवे नमोवः
पितरो नमो वो गृहान्नः पितरोदत्त सतोवः पितरो देष्म एत
द्धः पितरो वासः ॥ इतित्रिषु पिण्डोपरि सूत्रं दद्यात् ॥
मोटकयवजलान्यादाय ॥ अज्ञात नामगोत्राः सात्विक प्रेताः
दिविस्थाः विष्णुमयाः त्रिपिण्डीश्राद्धे पिण्डे एतद्वासः वो
मया दीयते युष्माकमुपतिष्ठन्ताम् ॥ १ ॥ मोटकाक्षत जला
न्यादाय ॥ अज्ञात नाम गोत्राः राजसप्रेताः अन्तरिक्षस्थाः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० ब्रह्ममयाः त्रिपिण्डी श्राद्धे पिण्डे एतद्वासः वो मया दीयते श्रा०
॥४०॥ युष्माक मुपतिष्ठन्ताम् ॥ २ ॥ मोटक तिल जला न्यादाय ॥
अज्ञात नाम गोत्राः तामस प्रेताः भूमिस्थाः रुद्रमयाः त्रिपिण्डी
श्राद्धे पिण्डे एत द्वासः वो मया दीयते युष्माक मुपतिष्ठन्ताम्
॥३॥ पिण्डेषु तूष्णींगंध पुष्प धूप दीप नैवेद्य ताम्बूल वस्त्र
यज्ञोपवीत दक्षिणां दद्यात् ॥ भोजन पात्रेषु शिवा आपः
इति जलम् ॥ सौमनस्यमस्तु इति पुष्पम् ॥ अक्षतं चारिष्टं
इत्यक्षतान् ॥ त्रिषुस्थानेषु क्रमेण यव तंदुल तिलाक्षतान्
दद्यात् ॥ मोटक यव जलान्यादाय ॥ अज्ञात नाम गोत्राणां
सात्विकप्रेतानां दिविस्थानां विष्णुमयानां त्रिपिण्डी श्राद्धे
दत्तैतदन्नपानादिकमक्षय्य मुपतिष्ठन्ताम् ॥१॥ मोटका क्षत ॥३०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जलान्यादाय ॥ अज्ञात नामगोत्राणां राजसप्रेतानां अन्तरि
क्षस्थानां ब्रह्ममयानां त्रिपिण्डी श्राद्धे दत्तैतदन्न पानादिक
मक्षय्यमुपतिष्ठन्ताम् ॥ २ ॥ मोदक तिलजलान्यादाय ॥
अज्ञात नामगोत्राणां तामसप्रेतानां भूमिस्थानां रुद्रमयानां
त्रिपिण्डी श्राद्धे दत्तैतदन्न पानादिकमक्षय्य मुपतिष्ठन्ताम्।३।
ताम्रपात्रे गंधोदक यवाक्षत पुष्पमातुलिङ्ग फलानि स्थापयित्वा
अर्घ्यं दद्यात् ॥ अज्ञात नामगोत्राः सात्विकप्रेताः दिविस्थाः
विष्णुमयाः त्रिपिण्डीश्राद्धे मातुलिङ्गैरर्घो वो मया दीयते
युष्माकमुपतिष्ठन्ताम् ॥१॥ पुनः ताम्रपात्रे गंधाक्षत पुष्प
जलजम्बीरफलानि प्रक्षिप्य ॥ अज्ञात नामगोत्राः राजस
प्रेताः अन्तरिक्षस्थाः ब्रह्ममयाः त्रिपिण्डीश्राद्धे जम्बीर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

 फलैरर्घो वो मयादीयते युष्माकमुपतिष्ठन्ताम् ॥ २ ॥ पुनः
 ताम्रपात्रे गंधोदक पुष्प तिल खर्जूर फलानि निक्षिप्य ॥
अज्ञात नाम गोत्राः तामसप्रेताः भूमिस्थाः रुद्रमयाः त्रिपि
एडीश्राद्धे खर्जूरफलैरर्घो वो मया दीयते युष्माकमुप
तिष्ठन्ताम् ॥३॥ सव्यम् ॥ अघोराः पितरः सन्तु इति पिण्डो
परि पूर्वाग्रां जलधारां दद्यात् ॥ पूर्वाभिमुखः कृताञ्जलिः
आशिषः प्रार्थयेत् ॥ गोत्रन्नो वर्द्धताँ दातारो नोभि वर्द्धन्तां
वेदाः सन्तति रेवच ॥ श्रद्धा च नोमाव्यगमद्बहुदेयं च नो
स्तु । अन्नंच नो बहुभवेदतिथिंश्चलभेमहि । याचिता
रश्चनः सन्तु माच याचिष्मकञ्चन । एताः सत्याः आ
शिषः सन्तु सन्त्वेताः सत्याः आशिषः ॥ इति ॥ अप

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सव्यम् ॥ पिण्डोपरि दक्षिणाग्रान् सपवित्रान्कुशानास्तीर्य ॐ ऊर्ज्जंवहन्ती रमृतं घृतं पयः कीलालम्परिश्रुतम् ॥ स्वधास्थ तर्प्पयत मेपितॄन् ॥ इति दक्षिणाग्रां जलधारां पयधारां वा पिण्डोपरि दद्यात् ॥ सव्यं आचम्य ॥ विष्णु तर्पणं ॥ ताम्रपात्रे जल दुग्ध तिल यव तुलसी सर्वोषधी चंदन पुष्प फल प्रक्षेपः हस्ताभ्यामञ्जलि मध्ये शंखमादाय विष्णोरुपरितर्पणम् ॥ पिण्ड समीपे शंखोदकेन शालग्राम शिलोपरि दर्भमय चट प्रतिमादौच वैदिक पौराणिक वैष्णव मंत्रान्पठन्नंकुर्यात् ॥ तद्यथा ॥ ॐ सहस्रशीर्षा० विष्णुं तर्पयामि ॥१॥ ॐ पुरुष एवेद ँ विष्णुँतर्प० ॥२॥ ॐ एता वानस्य० विष्णुंतर्प०॥ ॥ ॐ त्रिपादूर्ध्वं० विष्णुंतर्प० ॥४॥ ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततो विराडा विष्णुं तर्प० ॥५॥ ॐ तस्माद्यज्ञात्० विष्णुं तर्प०
॥६॥ ॐ तस्माद्यज्ञात्सर्वहुत ऋचः विष्णुं तर्प० ॥७॥ ॐ
तस्मादश्वा० विष्णुं तर्प० ॥८॥ ॐ तं यज्ञं० विष्णुं तर्प० ॥९॥
ॐ यत्पुरुषं० विष्णुं तर्प० ॥१०॥ ॐ ब्राह्मणोस्य० विष्णुं
तर्प० ॥११॥ ॐ चन्द्रमा० विष्णुं तर्प० ॥१२॥ ॐ नाभ्या०
विष्णुं ॥१३॥ ॐ यत्पुरुषेण० विष्णुंतर्प० ॥१४॥ ॐ सप्ता
स्या० विष्णुं तर्प० ॥१५॥ ॐ यज्ञेन यज्ञ० विष्णुं तर्प०॥१६॥
ॐ इदं विष्णुं० विष्णुं तर्पयामि ॥ १७ ॥ ॐ इरावती धेनु
मती हि भूत᳕ सूयवसिनी मनवे दशस्या ॥ व्यस्कभ्ना
रोदसी विष्णवे त्वेदाधर्त्थ पृथिवीमभितो मयूखैः स्वाहा
विष्णुं तर्प० ॥१८॥ ॐ देवश्रुतौ देवेष्वा घोषनम्प्राची प्रेत

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मद्ध्वरङ्कल्पयन्तीऽऊद्ध्वँयज्ञन्नयतम्मा जिह्वरतम्मास्वङ्गोष्ठम्प्रजा
म्मानिर्ब्बाधिष्ठ मन्त्र रमेषां वर्षन्न पृथिव्याः विष्णुं तर्प० ॥
ॐ बिष्णोर्नुकं वीर्य्याणि प्रवोचंयः पार्थिवानि विममे रजा
ᳪं सि ॥ योऽस्कभाय दुत्तर ᳪं सधस्थ विचक्रमाण स्त्रेधो
रुगायो विष्णवेत्वा ॥ विष्णुं तर्प० ॥२०॥ ॐ दिवो वा विष्ण
ऽउतवा पृथिव्या महो वा विष्णऽउरो रन्तरिक्षात् ॥ उभाहि
हस्ता व्वसुना पृणस्वा प्प्रयच्छ दक्षिणा दोतसव्याद्विष्णवे
त्वा विष्णुं तर्पयामि ॥२१॥ ॐ प्रतद्विष्णु स्तवते वीर्य्येण मृगो
न भीमः कुचरो गिरिष्ठाः ॥ यस्यो रुषु त्रिषु विक्रमणे ष्वध
धि क्षियन्ति भुवनानि विश्वा बिष्णुं तर्पयामि ॥ २२ ॥
ॐ विष्णो रराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० विष्णोर्ध्रुवोसि ॥ वैष्णवमसि विष्णवे त्वा विष्णुं तर्पयामि ॥ श्रा०
॥६३॥ २३॥ इति ॥ अथ पौराणोक्त तर्पणम् ॥ ॐ विष्णुस्तृप्यतु
॥१॥ ॐ गोविन्दस्तृप्यतु ॥ २ ॥ ॐ केशवस्तृप्यतु ॥३॥
ॐ माधवस्तृप्यतु ॥४॥ ॐ श्रीधरस्तृप्यतु ॥ ५ ॥ ॐ हृषी
केश स्तृप्यतु ॥ ६ ॥ ॐ पद्मनाभस्तृप्यतु ॥७॥ ॐ पुरुषो
त्तम स्तृप्यतु ॥८॥ ॐ अनिरुद्धस्तृप्यतु ॥ ९ ॥ ॐ संकर्षण
स्तृप्यतु ॥ १० ॥ ॐ चतुर्भुजस्तृप्यतु ॥ ११ ॥ ॐ पुण्डरी
काक्षस्तृप्यतु ॥ १२ ॥ ॐ मधुसूदनस्तृप्यतु ॥ १३ ॥
ॐ अच्युतस्तृप्यतु ॥ १४ ॥ ॐ जनार्दनस्तृप्यतु ॥१५॥
ॐ अनन्तस्तृप्यतु ॥ १६ ॥ ॐ वैकुण्ठस्तृप्यतु ॥१७॥
ॐ उपेन्द्रस्तृप्यतु ॥ १८ ॥ ॐ त्रिविक्रमस्तृप्यतु ॥१९॥ ॥४३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ गदा पाणि स्तृप्यतु ॥२०॥ ॐ श्रीवत्सस्तृप्यतु ॥२१॥ ॐ श्रीकान्तस्तृप्यतु ॥ २२ ॥ ॐ दामोदरस्तृप्यतु ॥२३॥ ॐ वनमालिनस्तृप्यतु ॥२४॥ ॐ नरोत्तमस्तृप्यतु ॥ २५ ॥ ॐ नृसिंहस्तृप्यतु ॥ २६ ॥ अष्टोत्तर सहस्रनामभिर्विष्णु स्तृप्यतु ॥ २७ ॥ अनादिनिधनो देव शंखचक्र धरः प्रभुः ॥ अक्षय्य पुण्डरीकाक्ष प्रेत मोक्षप्रदोभव ॥ विष्णु स्तृप्यतु ॥ १ ॥ अतसीपुष्प संकाशं पीतवासं समच्युतम् ॥ ये नमस्यंति गोविन्दं न तेषां विद्यते भयम् ॥ विष्णुस्तृ-प्यतु ॥ २ ॥ कृष्ण कृष्ण कपालोत्वंमगतीनां गतिर्भव ॥ संसारार्णव मग्नानां प्रसीद परमेश्वर ॥ विष्णुस्तृ-प्यतु ॥ ३ ॥ नारायण सुरश्रेष्ठ लक्ष्मीकान्त वरप्रद ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

 अनेन तर्पणेनाथ प्रेत मोक्षप्रदोभव ॥ विष्णुस्तृप्यतु ॥४॥
॥३४॥ ततोऽपसब्यम् ॥ तिलादियुक्त शंखेन त्रयो पिण्डोपरि एक
तन्त्रेण तर्पयेत् ॥ तद्यथा ॥ धन लोभ मृता येच गतिर्येषां
न विद्यते ॥ समे प्रेत सुखं दद्यात्तस्मै दुग्धं तिलो
दकम् ॥१॥ कपिला क्षीर पानेन अगम्या गमनेन च ॥ समे
प्रेत सुखं० ॥२॥ अपात्रे चैव दानेन प्रेतरूपी व्यवस्थितः ॥
समे प्रेत० ॥३॥ स्ववंधुर्पितृवंधुर्वा प्रेतरूपी व्यवस्थितः ॥
समे प्रेत० ॥४॥ पुत्रोवा भ्रातृ वर्गो वा प्रेतरूपी व्यवस्थितः ॥
समे प्रेत० ॥५॥ मातृ पितृव्यकादिश्च प्रेत भावेन संस्थितः ॥
ते सर्वे तृप्ति मायान्तु तेषां दुग्धं तिलोदकम् ॥ ६ ॥ मातु- ॥४४॥
लानी स्वपत्नी च गोत्रिणो स्वय मेवच ॥ ते सर्वे० ॥७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पितृ वंशे च ये जाता मातृ वंशे तथैव च ।। ते सर्वें० ।।८।।
नाना योनि गता येच महास्थल निवासिनः ।। ते सर्वें० ।।९।।
ये केचित्प्रेत रूपेण यमेन परिपीडितः ।। तेसर्वें० ।। १० ।।
ये केचित्प्रेत रूपेण तृषार्त्ताः परिपीडितः ।। तेसर्वें० ।।११।।
महाप्रेता महाभागा प्रपूर्यां च समाश्रिताः ।। तेसर्वें
तृप्तिमा० ।। १२ ।। असंख्याता महाघोरा प्रेतरूपैर्व्यव
स्थिताः ।। ते सर्वें तृप्ति० ।। १३ ।। असंख्याता महाप्रेता
साखा न्यग्रोध संस्थिताः ।। ते सर्वें तृप्ति० ।।१४।। प्रेतलोके
च ये जाता मुद्गरैर्बहुखण्डिताः ।। तेसर्वेंतृप्ति० ।। १५ ।।
ब्राह्मणा वृत्तिहरणात्प्रेतरूप व्यवस्थिताः ।। तेसर्वें० ।। १६ ।।
वृत्ति भङ्गकरा ये वै प्रेतरूपे व्यवस्थिताः ।। ते सर्वें तृप्ति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृ० मा० ॥१७॥ क्रियालोपगता ये च सर्प व्याघ्र हताश्च ये ॥ श्रा०
॥४५॥ ते सर्वे तृ० ॥ १८ ॥ ज्वालाग्निनिर्मृता येच विद्युत्पाता
दिभिस्तथा ॥ ते सर्वे० ॥१९॥ अपुत्रिणो मृता येच कुल धर्म
विवर्जिताः ॥ ते सर्वे० ॥२०॥ तप्त तैले च निःक्षिप्ताः यम
लोके महा भये ॥ ते सर्वे० ॥२१॥ किंकरैः पीडिता ये च
सुदृढा खण्डशः कृताः ॥ ते सर्वे तृ० ॥२२॥ पापेन पीडिता
कंठे यमदूतैर्महाबलैः ॥ ते सव तृप्ति० ॥२३॥ संदशैर्घन
पातैश्च खण्डिताः यम किङ्कराः ॥ ते सर्वे तृ० ॥२४॥ वध्यन्ते
वहुभिर्पाशैर्यमदूतैर्महाबलैः ॥ ते सर्वे तृप्ति० ॥ २५ ॥
मस्तके मुद्गरैः घोरैः पीडिताः यम किङ्करैः ॥ ते सर्वे तृप्ति० ॥४५॥
॥ २६ ॥ यन्त्र मध्ये प्रपीड्यन्ते यमदूतैर्महाबलैः ॥ ते सर्वे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृप्ति० ॥२७॥ कुंभीपाके च निःक्षिप्तैः रौरवेच तथैवच ॥
ते सर्वे तृप्ति० ॥२८॥ गुर्वग्नि ब्राह्मणानांच पादे नैव च
पीडिताः ॥ ते सर्वे तृप्ति० ॥ २९ ॥ असीपत्रे खिद्यमाना
वृष भीत्या पलायिता ॥ ते सर्वे तृप्ति० ॥३०॥ ब्रह्मस्व हारिणो
येच देवद्रव्य विलुम्तकाः ॥ तेमे प्रेताः सुखं दद्यु स्तेभ्यः
दुग्धं तिलोदकम् ॥३१॥ मोटक यव जलान्यादाय ॥ ॐ
अज्ञात नामगोत्राणां सात्विक राजस तामस प्रतानां विष्णु
ब्रह्म रुद्रमयानां परलोके महातृषोपशमनार्थं जलँ दुग्ध
धारा वो मया दीयंते युष्माकमुपतिष्ठन्ताम् ॥ सव्य
माचम्य ॥ गोदानम् ॥ देश कालौ संकीर्त्य० गोत्रः शर्माहं
विष्णुप्रातिद्वारा तर्पण साङ्गता सिध्यर्थं मुक्तिं प्राप्त्यर्थं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च इदं गोनिष्क्रय भूतं द्रव्यं अमुक गोत्रायामुक शर्मणे ब्राह्मणाय दातु महमुत्सृजे (वा तुभ्य महं संप्रददे) अप सव्यम् ॥ अथ स्थापित कलशोदकेन पिण्डोपरि अभिषेचनम् ॥ प्रथम कुम्भं गृहीत्वा ॥ विष्णु कलशे स्थितं तोयं विष्णु सूक्तेन मंत्रितं ॥ तत्तोयाऽभिषेकेन प्रेतत्वं च निवृत्तयः ॥ विष्णुलोक प्राप्तिः ॥१॥ द्वितीय कलशं गृहीत्वा ॥ ब्रह्म कुम्भे स्थितं तोयं ब्रह्म सूक्तेन मन्त्रितम् ॥ तत्तोयाऽभिषेकेन प्रेतत्वं च निवृत्तयः ॥ ब्रह्म लोक प्राप्तिः ॥२॥ तृतीय कलशं गृहीत्वा॥रुद्र कुम्भे स्थितं तोयं रुद्र सूक्तेन मंत्रितम् ॥ अभिषिंचामि तत्तोयं प्रेतत्वं च निवृत्तयः ॥ रुद्रलोक प्राप्तिः ॥३॥ पिण्डान् स्पृष्ट्वा ॥ अनादि निधनो देव शंख

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चक्र धरः प्रभुः ॥ अव्ययः पुण्डरीकाक्ष प्रेत मोक्षप्रदो भव॥१॥
अतसीपुष्प संकाशं पीत वासं समच्युतम् ॥ ये नमस्यंति
गोविन्दं न तेषां विद्यते भयम् ॥२॥ कृष्ण कृष्ण कृपालो त्व
मगतीनां गतिर्भव ॥ संसारार्णव मग्नानां प्रसीद परमेश्वर
॥३॥ इतिपठित्वा ॥ नम्रीभूय पिण्डमाघ्रायोत्थापयेत् ॥
पिण्डाधारकुशानुल्मुकं च वह्नौक्षिपेत् ॥ अर्घपात्राणि
संचाल्य दक्षिणां दद्यात् ॥ तद्यथा ॥ मोदक यव जला
न्यादाय ॥ अज्ञात नामगोत्राणां सात्विक प्रेतानां दिवि-
स्थानां विष्णु मयानां कृतैतत् त्रिपिण्डी श्राद्ध प्रतिष्ठा
सिध्यर्थं इदं वस्त्रोपवस्त्रं स दक्षिणाकं तन्निष्क्रय द्रव्यं वा
यथा नाम गोत्राय ब्राह्मणाय सात्विकाय दातुमह मुत्सृजे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

 (वा तुभ्यमहं संप्रददे) प्रार्थना ॥ शीतवातोष्ण संत्राणं
 लज्जाया रक्षणं परम् ॥ देहालङ्करणं वस्त्रमतः शांतिं प्रयच्छ
मे ॥१॥ राजसे ॥ मोटकाक्षत जलान्यादाय ॥ अज्ञात नाम
गोत्राणां राजसप्रेतानां अन्तरिक्षस्थानां ब्रह्ममयानां कृतैतत्
त्रिपिण्डी श्राद्धप्रतिष्ठा सिध्यर्थं तृषोपशमनार्थं चमिष्टवारिपूर्णं
कमण्डलुं सदक्षिणाकं तन्निष्क्रय द्रव्यं वा यथा नाम गोत्रा
य ब्राह्मणाय राजसाय दातुमह मुत्सृजे (वातुभ्य महं
संप्रददे) प्रार्थना ॥ कमण्डलु जलैः पूर्णं स्वर्ण गर्भः सुलक्षणः
अर्पितस्ते महासेन प्रसन्नस्तेन संभव ॥ २ ॥ तामसे ॥
मोटकतिल जलान्यादाय ॥ अज्ञात नामगोत्राणाँ तामस
प्रेतानां भूमिस्थानां रुद्रमयानां कृतैतत् त्रिपिण्डी श्राद्ध

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रतिष्ठा सिध्यर्थं उपानद्यु गलौ छत्रं च सदक्षिणाकं तन्नि
ष्क्रय द्रव्यं वा यथा नाम गोत्राय ब्राह्मणाय तामसाय दातु
मह मुत्सृजे ॥ [वा तुभ्यमहं संप्रददे] प्रार्थना ॥ उपानहौ
प्रयच्छामि कंटकादि निवारणे ॥ परित्राणाय ते विप्र गृहाण
त्वं सुखी भव ॥ ३ ॥ अथ गोदानम् ॥ मोटक यव जला
न्यादाय ॥ अज्ञात नाम गोत्राणां सात्विक प्रेतानां दिविस्था
नां विष्णुमयानां मुक्तिप्रद श्रीविष्णु प्रीतिद्वारा मुक्ति
प्राप्त्यर्थं इदं मोक्षधेनु निष्क्रय भूतं द्रव्यं यथा नाम गोत्राय
ब्राह्मणाय दातु मह मुत्सृजे (वा तुभ्य महं संप्रददे) मोटका
क्षत जलान्यादाय ॥ अज्ञात नाम गोत्राणां राजसप्रेतानां
अन्तरिक्षस्थानां ब्रह्ममयानां मुक्तिप्रद श्रीब्रह्म प्रीति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वारा मुक्तिप्राप्त्यर्थं इदं मोक्ष धेनु निष्क्रय भूतं द्रव्यं यथा नाम गोत्राय ब्रह्मणाय दातु मह मुत्सृजे (वातुभ्य महं संप्रददे) मोटक तिल जलान्यादाय ॥ अज्ञात नाम गोत्राणां तामसप्रेतानां भूमिस्थानां रुद्रमयानां मुक्ति प्रद श्रीरुद्र प्रीतिद्वारा मुक्तिप्राप्त्यर्थं इदं मोक्षधेनु निष्क्रय भूतं द्रव्यं यथा नाम गोत्राय ब्राह्मणाय दातु मह मुत्सृजे (वातुभ्य महं संप्रददे) अथप्रार्थना ॥ त्रिलोकी नाथ देवेश सर्वभूत दयानिधे ॥ दानेनानेन तुष्ट स्व प्रयच्छगति मुत्तमाम् ॥ इति अथ तिलपात्र दानम् ॥ त्रिकुशाक्षत जलान्यादाय ॥ अज्ञातनामगोत्राणां सात्विक राजस तामस प्रेतानां दिव्यन्तरिक्ष भूमिस्थानां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विष्णुब्रह्मरुद्रमयानां तिलपात्र दानकल्पोक्त मुक्ति फल प्राप्त्यर्थं इदं तिलपात्रं स सुवर्णं यथानाम गोत्राय ब्राह्मणाय दातुमहमुत्सृजे (वा तुभ्यमहं संप्रदद) प्रार्थना ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च ॥ तिलपात्रप्रदानेन तानि नश्यन्ति सर्वदा ॥ कृतैतत्तिल-पात्र दानकर्मणः साङ्गता सिध्यर्थं इदं दक्षिणा द्रव्यं यथा नाम गोत्राय ब्राह्मणाय दातुमहमुत्सृजे (वा तुभ्यमहं सं-प्रदद) अथाज्यावलोकनम् ॥ ॐ रूपेण वो रूपमभ्या गान्तु थो वो विश्ववेदा विभजतु ॥ ऋतस्य यथा प्रेत चन्द्र दक्षिणा विश्वः पश्यन्त्यन्तरिक्षं य्यतस्व सदस्यैः ॥ त्रिकुशाक्षतजलान्यादाय ॥ देश कालौ संकीर्त्य० गोत्रः शर्मा मम कायिकादि समस्तपापक्षयपूर्वक श्री परमेश्वरप्रीत्यर्थं इदं घृतपूर्णं कांस्यपात्रं सहिरण्यं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

 यथानाम गोत्राय ब्राह्मणाय दातुमहमुत्सृजे (वा तु
 भ्यमहं संप्रददे) प्रार्थना ॥ या लक्ष्मीर्यच्च मे
दौस्थं सर्वाङ्गं समुपस्थितम् ॥ तत्सर्वं नाशयाज्यत्वं
श्रियमायुश्च वर्द्धय ॥ आज्यं तेजः समुद्दिष्टमाज्यं पाप
हरम्परम् ॥ आज्यं सुराणामाहार सर्वमाज्ये प्रतिष्ठितम्
आज्यपात्रप्रदानेन शान्तिरस्तु सदा मम ॥ अथ
ब्राह्मणभोजन संकल्पः ॥ अज्ञातनामगोत्राणां सात्विक
राजस तामस प्रेतानां दिव्यन्तरिक्षाभूमिस्थानां विष्णु ब्रह्म
रुद्रमयानां अक्षयतृप्तिप्राप्तिद्वारा मुक्तिप्राप्तिकामः
ब्राह्मण त्रयं पक्वान्नेन पायसेन कृसरान्नेन चाहं
करिष्ये ॥ तेभ्यः ताम्बूल दक्षिणां च दास्ये ॥ कृतैतद्विष्णु
ब्रह्म रुद्र सूक्त पाठ कर्मणः साङ्गता सिध्यर्थं मनसोद्दिष्टां
दक्षिणां नानानाम गोत्रेभ्यो सूक्तपाठकर्तृकेभ्यो ब्राह्मणे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भ्यः विभज्य दातुमहमुत्सृजे ॥ ॐ वाजे२वाजेवत
व्वाजिनो नो धनेषु विप्रा ऽ अमृता ऽ ऋतज्ञाः ॥ अस्य मद्ध्वः
पिवत मादयध्वं तृप्ता यात पथिभिर्देव यानैः ॥ इति
विसृज्य ॥ उतिष्ठन्तु सात्विक राजस तामस प्रेता ॥ ॐ
आमा व्वाजस्य प्रशवो जगम्या देमे द्यावा पृथिवी विश्व
रूपे ॥ आमा गन्ताम्पितरामातसचामा सोमोऽअमृतत्वेन
गम्यात् ॥ इति अनुवृज्य ॥ अथ प्रार्थना ॥ दिव्यन्तरिक्ष
भूमिस्थाः सात्विका राजसस्तथा ॥ प्रेता वै तामसा येन्ये
शांतिं गच्छन्तु तर्पिताः ॥ कृतस्य त्रिपिण्डी श्राद्ध कर्मणः
साङ्गता सिध्यर्थं आचार्याय मनसो दिष्टां दक्षिणां दातु मह
मुत्सृजे ॥ कृतस्य त्रिपिण्डी श्राद्ध कर्मणः साङ्गता सिद्धयर्थं
तन्मध्ये न्यूनातिरिक्त दोष परिहारार्थं नानानाम गोत्रभ्यो
ब्राह्मणेभ्यः यथोत्साहं भूयसीं दक्षिणां दातु मुत्सृजे ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अपसव्यम् ॥ रक्षादीपं निर्वाप्य ॥ हस्तौ पादौ प्रक्षाल्या चम्य ॥ ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेत्ता ध्वरेषु यत् ॥ स्मरणाद्देव तद्विष्णोः संपूर्णस्या दितिश्रुतिः ॥ यस्य स्मृ-त्याच नामोऽत्या तपो यज्ञ क्रियादिषु ॥ न्यूनं सम्पूर्णतां यांति सद्यो वन्देतमच्युतम् ॥ विष्णवे नमः विष्णवे नमः विष्णवे नमः॥ अथ तीर्थाधिपतिं सम्पूज्य यथा विभव दक्षिणां दद्यात् ॥ ततो कपर्दीश्वर संन्निधौ अश्वत्थे गदाधरं सम्पूज्य॥ कृसरान्न सर्वौषधी तिल दुग्धानि समर्प्य॥ अश्वत्थमूले तिल संयुतं दुग्धधारां जलधारां वा दद्यात् ॥ प्रार्थना ॥ वृक्षराज नमस्तुभ्यं सर्वदेव मम प्रभो ॥ मम देहस्य संतापं हर त्वं वारिधारया ॥ इति त्रिपिंडी श्राद्धः समाप्तः ॥

महेश प्रसाद द्वारा, सत्यनाम प्रेस, मैदागिन बनारस सिटी में मुद्रित ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीयुत पण्डित बाबूनन्दन जी मिश्र प्रणीत ।

(१) ग्रहप्रयोग अर्थात् ग्रहशान्ति नवग्रह चक्र सहित (संशोधित संस्करण) ।॥)

(२) विवाह पद्धति ≡)

(३) उपनयन पद्धति ।)

(४) श्राद्ध संग्रह अर्थात् अपूर्व श्राद्ध विवेक नवीन १।)

(५) तृपिण्डी श्राद्ध पद्धति ।)

विविध पुस्तक प्राप्तिस्थान—

मास्टर खेलाड़ीलाल एण्ड सन्स,

संस्कृत बुकडिपो,

कचौड़ी गली,

बनारस सिटी ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

* इति *

शुक्लयजुर्वेदीय त्रिपिण्डीश्राद्धपद्धतिः

* समाप्ता *

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection